सिक्किमदेशे



प्रणेता—त्रिपाठी डॉ० सुधाकराचार्यः

प्रणेता: त्रिपाठी डॉ० सुधाकराचार्य:
प्रवक्ता संस्कृतस्य
मेरठविश्वविद्यालये, मेरठनगरे
(उ० प्र०) २५०००१

प्रकाशक: राजमती प्रकाशनम्, मेरठ (उ० प्र०)

मुद्रक: श्रीकान्त: पाठक:
'फाइन प्रिण्ट', १०६ शहराराबाग,
इलाहाबादनगरे, (उ० प्र०)

पुस्तकम् प्राप्तिस्थानम् : प्रणेतु: स्थानम् ।

"सर्वेऽधिकारा: पुनर्मुद्राणादिका: प्रणेतुरेव सन्ति ।"

नागपञ्चमी
अगस्त, १९७८

मूल्यम्—रुप्या
रु०



"क्वापि दत्तं किमपि कस्मैचिन्मुदा विस्मृतं यत्
तत्पुनः केनापि सद्यः सादरं प्रतिदीयते ।"
यया मात्रा बाल्यकाले ह्येष धर्मः शिक्षितः
दानमूलः कलिगतस्तस्यै नमस्तस्यै नमः ॥

(द्वाविंशतितमे पृष्ठे)

किमप्यात्मीयम्

अस्ति भारतवर्षस्य पूर्वेऽञ्चले वङ्गदेशशिखरस्थ: कश्चिद्धिमालयक्रोडस्थ: काञ्चनजङ्घालालित: सिक्किमदेश: । कथ्यते यन्महाभारतयुद्धानन्तरं युधिष्ठिरस्य भ्रातृभि: सह हिमालयप्रवेश: सिक्किमद्वारेणैव समभवत् । अद्यापि परिज्ञायते यक्षयुधिष्ठिरसंवादस्थली यक्षपरिरक्षिता 'खाचोवेरी' नाम्ना इन्द्रकीलपुष्करिणी पश्चिमसिक्किमे । आङ्ग्लाधिकृते भारतवर्षे नास्य भूभागस्य किमपि महत्वं विज्ञातम् । स्वतन्त्रे सति भारतवर्षे, चीनेन बलादधिकृते च त्रिविष्टपदेशे (तिब्बत) बौद्धशासितोऽयं देश: प्रकाशं प्राप्त: ।

पुनर्जन्मविषयकं शोधं कुर्वता मया पूर्वचिन्तितासीत् नेपालभूटानसिक्किम-देशानां शोधयात्रा यया खलु साधीयान् भवेत् बौद्धसाहाय्यात् शोधप्रयास: । संयोगात् भारतसर्वकारेण 'तिब्बतोलोजी फेलोशिप्स्' परियोजनायां 'नाङ्याल-इंस्टिच्यूट्-आव-तिब्बतोलोजी, गंगटौक, सिक्किम 'इतिनाम्नि त्रैविष्टपसंस्थानेऽयं जन: प्रेषित: । सुखं तत्र निवसता शोधं प्रकुर्वता च मया ब्राह्मणानां साक्षाद्दर्श-नाय शोधयात्रेयं विहिता ।

तत्र च दक्षिणपश्चिमसिक्किमयोर्यात्रां कुर्वता मयाऽयं लेखो व्यलेखि प्रतिदिनम् । तमेव भवतां पुरत: प्रेषयित्वा सन्तुष्यामि ।

सुधाकराचार्य:

सी-७, विश्वविद्यालयक्षेत्रे
मेरठनगरे (उ. प्र.) भारतवर्षे ।
(२५०००१)

२०-१०-७४

सिक्किमदेशे

अथ श्रीमद्भिः 'प्रखर' महोदयैः सार्धं राजधानीतो गान्तोकपुरतः सिङ्ताम्पुरं सम्प्राप्तोऽस्मि । असौ प्रखरमहोदयः सततं प्रसन्नवदनः खल्वाट-शिरस्कः साम्यवादप्रियश्च नितरां विवेकपदवीषु विलसति । तस्य पत्नी मम भगिनीत्वेन स्वात्मानं कृतार्थीकरोति । तस्याः पिता ऋषिकान्तः सिंहो 'बाजे'-सम्वन्धेन प्रियमुखः प्रियवाक् प्रियपरिधानः किं वहुना प्रियवहुलतया तत्र प्रियतमः स्मितैराह्वयत्येव ।

सिङ्तामपुरं स्रोतस्विन्योः सङ्गमस्थले विराजते । समुद्रतलात् सहस्रद्वय-प्रायमात्रे उच्चस्थाने ऊष्मासमे वातावरणे राजमानमपि गान्तोकवासिने स्वेद-प्रचालकमित्यनुभवामि ।

रात्रौ स्वच्छं नभः । स्पष्टतारको भाति तृतीयायाश्चन्द्रः । पर्वत-शिखरेऽयं चन्द्रिकाभिः तिष्ठति । अद्य मासत्रयानन्तरं स्यादयं प्रथमदृष्टश्चन्द्रः । गान्तोकपुरे तु मेघक्रोडेषु सुप्तः कदापि न दृष्टः । भवतु, यात्रायाः प्रथमे दिवसे प्रसन्नतरो गायन्नेव स्वस्वपम् ।

अथाशुभैः स्वप्नैः विलम्वेनाजागरम् । स्वप्ने मृतः प्रखरमहोदयः दृष्टः । भगिनी, मां दर्शं दर्शं विलपमाना दृष्टा । भगवान् चन्द्रशेखरः सान्त्वयन्निव यज्ञोपवीतं दत्तवानिति च वारं वारं दृष्टम् ।

जागरितः क्वचिदपि गमने अलसमानसोऽस्मि । बाजेमहोदयेन सह शतरञ्ज-सङ्गरं क्रीडन्नेव तिष्ठामि ।

भवतु, बर्मेक्मन्दिरं दृष्टुं प्रयातः इदं खलु पारेतीस्तानदीं पर्वतशिखरे शीतलहरीपटले विराजमानं बुद्धपद्मसम्भवयोरावासस्थानं, हरितशष्पपरिवेष्टितं व्राह्मणद्वयसमन्वितं दुन्दुभिनादैर्गुञ्जितं, राराजतेतराम् । तत्र व्राह्मणाभ्यां किमपि

विशिष्टं न प्राप्तम् । केवलं नयनसेकः सञ्जातः न श्रवणलाभः । तैरुक्तं यत्र तेऽवतारभूताः ब्राह्मणाः, पुनर्जन्मविषयिणी वार्ता त्ववतीर्णा एव जानन्ति सम्यगिति ।

निवृत्तो मध्याह्ने प्रखरमहोदयं पूर्णोदरं तूष्णीं स्थितं पश्यामि । दर्शं दर्शं तस्य गम्भीरमुखं स्मारं स्मारं च रात्री दृष्टं स्वप्नं व्याकुलो भवामि । चिन्तयामि यद्यज्ञोपवीतेनैनं समलङ्कुर्यां चेत् अस्य विपत्तिः स्थगिता स्यादिति ।

आग्रहपूर्कं समीपवाहिन्यां स्रोतोवहायां कुल्यायां सपुत्रकेण प्रखरमहाभागेन सहाहमपि स्नामि । गृहं पुनरागत्य हरिद्रालिप्तं यज्ञोपवीतं समन्त्रकं वाजे भगिनीभ्यां सह तस्य स्कन्धे परिधापयामि । सत्यं, भाति चन्द्रचूडस्य सान्त्वना लहरी प्रखरस्य स्मयमाने मस्तके । निश्चिन्तमात्मानमनुभूय प्रसन्नस्तिष्ठामि ।

भोजनानन्तरं तिष्ठत्येव मयि जीपध्वनिः आक्रोशयन्निव नीचैः राजमा गुञ्जति । दूतेनोक्तं यत्तेन स्थानद्वयं सुरक्षितं, गन्तव्यं च सामुदोंङ्मन्दि दृष्टुं मया, माखाकार्यनिर्णयाय च प्रखरमहाभागेन, माखापर्यन्तम् । अन्यमनस इव प्रखरमहाभागेन सह गच्छामि । जीपसञ्चालकस्य दक्षिणतः प्रथममहं, तद प्रखरः ततश्च माखाग्रामस्य ब्राह्मणः ततश्च तस्य पत्नी; पृष्ठतश्च दश द्वादशाः जनाः तिष्ठन्ति । तत्रैव मम परिचितः कश्चिद्बालकः ओमप्रकाशशर्मा तिष्ठति अत एव तैः सार्धं हसन्नेव प्रयामि । ब्राह्मणेनोक्तं यत्प्रखरमहोदयस्तस चिरन्तनः सखा । यथा हि तेनेदमुक्तं तस्य मुखेऽपि मृत्युच्छायां अकस्मादे पश्यामि ।

सिङ्तामपुरतः क्रोशद्वये मार्गे व्यतीते सहसा जीपयन्त्रं निरर्गलं धावित् मारभते । पश्यत्स्वेवास्मासु जीपयानं निरर्गलं वामतो राजमार्गात् तीस्ता द्रीखातकेषु विलुण्ठन् पतति । एकं विलुण्ठनं पश्यामि । ब्राह्मणः चिन्तापटला बहिर्गतः । प्रखरमहाभागः विस्मृतिपटलं प्रयातः केवलमात्मचिन्ता बाधतेतराम्

किं भवति, किं वा न भवति, पुत्रीपत्नीमातादिसमन्वितः परिवार एव चन्द्रचूडसनाथः परिवृत्य मां तिष्ठतीति सम्यगनुभूयते ।

सद्य एव ज्ञायते यद्राजमार्गतः पञ्चशतमात्रे नीचैस्तः शिलातले प्रसृतपादः उन्नमितचिबुक आराममुद्रया चक्षुषी निमील्य तिष्ठामि । उन्मीलितयोः चक्षुषोः पश्यामि यन्मम पुरत एव प्रखरमहाभागः स्वपिति । तन्नीचैः ब्राह्मणः अधोमुखो निश्चेतनः स्वपिति । तदनु तस्य पत्नी, तदनु च नदीजलेषु जीपयानम् ।

जीपदर्शनेन स्मरामि यद्वयं सहैव जीपयात्रायाम् आस्म । समग्राऽपि स्थितिः क्षण एव स्मरणपटले तलीविजनमिव गच्छति । उपरिष्टात्पश्यामि यत्सर्वेऽपि बालकाः जनाश्च इतस्ततः प्रक्षिप्ता इव विलुण्ठन्ति ।

क्षणानन्तरम् उत्थाय प्रथममात्मानं निरीक्षे । न क्वचिदपि रक्तं दृश्यते । सर्वथा निर्घातकः स्वयमुच्छलित इवानुभवामि । पश्यामि यत् प्रखर-महाभागः मत्समीप एव निःश्वसन् उत्तिष्ठति । तस्य मुखं रक्तरञ्जितं, कर्पटानि रक्तसिञ्चितानि, दक्षिणपादश्च रक्तधारया जम्बालमिव दृश्यते । रक्तं प्रवहदेव वर्तते, नैव विरमते । किञ्चिदनुस्मृत्य यज्ञोपवीतेन ग्रथ्नामि । अहह ! रक्तं विरतं, यज्ञोपवीतमद्यैव धृतं प्राणरक्षकं सञ्जातं, चन्द्रचूडसाहाय्येन च सुरक्षिताः प्राणास्तस्य । ब्राह्मणः मृत एव तत्र दृष्टः । तस्य पत्नी मूर्छिता । भवतु घटिका-र्धेन राजपुरुषाः तत्रागताः । तैः सर्वेऽपि राजमार्गे नीताः, ततश्च सिङ्ताम्वर्तिनं राजकीयमौषधालयम् ।

तत्र सम्यक्परीक्ष्य दृष्टम् । अहं हि सर्वथा घटनाबाह्य एव निर्धारितः । स्वस्थः । अन्ये बालकाः प्रायः स्पृष्टघातकाः सद्य एव वस्त्रखण्डैः परिवृतगात्राः बहिष्कृताः । प्रखरमहाभागाः द्वादशस्थानेषु केवलं बाह्यत एव घातकैः स्पृष्टाः, धृतवस्त्रखण्डाः औषधप्रवेशपूर्वकं सायङ्काले औषधालयतः गृहं प्रेषिताः । ब्राह्मणो मृतो घोषितः । तस्य पत्नी च मूर्च्छिता तत्रैवौषधालये स्वपिति । तस्य पुत्री भग्नपादा तत्र विलपति ।

अद्यावधि प्रखरमहाभागो निःसंस्कार एव जीवनं यापयति स्म । अद्यैव

साग्रहं तस्य यज्ञोपवीतसंस्कारो मया सम्पादितः । तेनायमवसर,: दुर्घटनायाः घातकत्वं, तत्र च आश्चर्यतया जीवनरक्षा-समग्रमपि एकत्र कृत्वा विचारः कृतः । मयि सानुशयः सञ्जातः तस्य परिवारः । अहञ्च भगवन्तं मृगाङ्कमौलिं सानुशयं चिन्तयामि—का हि तस्य लीलेति ।

प्रखरमहाभागः सपत्नीकः, सश्वसुरः, सपरिवारश्च सिङ्‌ताम्पुरे वर्तते । अहं हि स्वस्थोऽपि हृत्तन्त्रीझङ्कारात् व्याकुलचेता ओम्प्रकाशेन सह गान्तोकं गच्छामि । यतो हि असावेकाकी कुत्र स्यादिति तस्य कृते प्रबन्धायाहं सन्नद्धः ।

ओम्प्रकाशः गान्तोकस्थे ताशीनाङ्यालोच्चतरमाध्यमिकपाठशालायां नवम-कक्षायाः विद्यार्थी स्वाध्यापकस्य विजयबहादुरसिंहस्य गृहे निवसति । असौ सिंहमहोदयः मेरठनगरनिवासी, यत्र विश्वविद्यालयेऽहं संस्कृताध्यापकः । मेरठनगर एव आवां परिचितौ । असौ हि अफ्रीकामहाद्वीपं प्रोष्य तत्रत्यं वर्णनं भूरिशः कुर्वाणः योगजिज्ञासुः वृद्धोऽध्यापकोऽर्थशास्त्रस्य ।

ओम्प्रकाशं तन्निवासे प्रापयित्वा आदिवसं आरात्रि च पर्यङ्के लुण्ठन्निव विश्रान्तो भावनाभिरात्मानं सान्त्वयन् परिजनेभ्यः पत्राणि लिखित्वा सूचनार्थं प्रेषयामि ।

तेषामेव कृते चन्द्रमौलिना निर्घातं सम्यगुच्छालितोऽयं जनोऽद्य कृतपुण्य-मात्मानमनुभवति ।

अस्ति अयोध्यासिंहः सिक्किमखादीग्रामोद्योगसंस्थानस्य संयोजको गान्तोक-नगरे । असौ भारतस्य विहारप्रान्ते वेगूसरायसमीपत्यः अत्र निवसति साम्प्रतम् । असौ सङ्गीतबाह्योऽपि गायनपटुः निःस्वरोऽपि उन्नादनिपुणः, वाक्येष्वज्ञोऽपि, भाषणपटुः स्फुटवक्ता विवेकप्रवीणः गुणागुणयुक्तत्वात् सत्यं न देवो न च दानवो, मानव इति स्पष्टं सान्ध्यगोष्ठीषु मदीयो नित्यसखा ।

अनेन ह्य एव निश्चितं यन्मङ्गलवासरे गन्तव्यम् । तेन सह प्रातरेव जीपेनैकेन यात्रा प्रारब्धा । अस्माभ्यां सार्धं तस्यानुगो रामचन्द्रसिंहोऽपि प्राचलत् ।

असौ रामचन्द्रसिंहः लम्बमाननासिकः खल्वाटशिरस्कः विसूचिकाचिह्नित-मुखत्वात् छिद्रबहुलवदनः, बहुभोजनोऽपि किञ्चिदूनौजस्कः अन्तर्लीन इव चिन्तित इव, पित्तपीडितत्वात् क्रोधभुक्त इव उत्कण्ठित इव, इतस्ततो भ्रान्तचकितविक्षिप्त-तारकाभ्यां शून्यदर्शनलालसमानसः ।

मार्गे हि सिङ्तामपुर्यां प्रखरमहोदयं द्रष्टुं वयं तस्य गेहं गताः । अद्यायं स्वस्थप्रायः केवलं वस्त्रखण्डोपलिप्तः स्वकाष्ठपर्यङ्के शयानो हसन् वार्ता आलपति । तस्मै दुग्धं चूर्णं च ददामि । अत्र ज्ञातं यन्माखान्ब्राह्मणस्य पत्नी अद्यापि मूर्च्छिता एव शेते ।

भवतु, ततोऽहम् अयोध्यासिंहेन सार्धं रङ्पोपुरसकाशं माइनिङ्कार्पोरेशन-स्थानमागतः । तत्रावतीर्य राजमार्गेण तीस्तासेतुना पारेनदीं गच्छामि । नदीयं प्रायः सहस्रमात्रकविस्तीर्णा सिक्किमभूभागस्य सीमानिर्धारयित्री प्रमुखा नदी । पूर्वं हिमालयस्य जलं गङ्गायां समर्पयितुं धावन्ती, पर्वतोदरं विस्फारयन्ती, शिलाशकलानि चूर्णयन्ती, कूलपादपान् कृन्तयन्ती, कुल्याशरणा हिमजला धवल-सीकरशुभ्रा लम्बमानपर्वतकाननच्छायानीला गर्जन्ती प्रवहति । आन्दोलितः सेतुः पदातिमनांसि सम्यगान्दोलयतीति उच्छलन्नेव गच्छामि ।

पारेनदीं मार्गः पद्धतिभिः पर्वतकोणेषु सर्पिलं गच्छति । सततमुच्चैः प्रयाणात् पथिकः पर्वतारोही समग्रामपि सामग्रीं पृष्ठशरणां विधाय, पूरितोदरः लम्बश्वासः फूत्कारैः, पद्धतिषु पादाश्रयं दर्शं दर्शं शनैः शनैः सत्यं शनैश्चर इव प्रयाति । तदनुकूलमेवावश्यकाम् अल्पतमां सामग्रीं वहन्नहमपि पर्वतमुपरिष्टाद् गच्छामि ।

समतलभूमौ प्रयागपुर्यां मयराष्ट्रपुर्यां च निवासं विधायाद्य पर्वतारोही एकाकी किं नानुभवामि । क्वचिद्ध्वंस्रपशूनां भयं; क्वचित्पद्धतिद्वययोः स्वगन्तव्य-पद्धतित्यागभयं, क्वचिच्च पुनः अतिश्वासात् फुप्फुसस्फोटभयमिति भयाकुलोऽपि कार्यसमाप्तिसाहसबलेन चराम्येव ।

यत्र श्रान्तः, तत्रैव क्वचिद्वृक्षच्छायां निरूप्य, सामग्रीं शिलासु स्थापयित्वा क्षणं निश्वसन् तिष्ठामि ।

क्रोशत्रयं गत्वा तुरुङ्वसतिं प्राप्य श्रान्तः रानापालिगृहे विरमामि। तस्य पुत्रः सिक्किमरक्षासैनिकः पुत्री च खादीग्रामोद्योगसंस्थाने कार्पासिककारिणी पुत्री चन्द्रानामधेया मम पूर्वपरिचितास्ति।

ततः क्रोशद्वयं गत्वा नाम्थाङ्आपणं प्राप्नोमि। तत्र किमपि कवलीकृत्य क्रोशेन नाम्थाङ्मन्दिरं गच्छामि।

तस्मिन् मन्दिरे ब्राह्मण एकाकी परिचरेणैकेन सह निवसति। नैवानेन ग्रन्थाः ग्रन्थयो वा दृष्टाः। अतो निरर्थकं पर्वतारोहणं शीतवातैः समानन्दितं चेय-पानेन विश्रान्तं, ब्राह्मणगीतैः समनुमोदितं शृगालहुक्काभिः शुभीकृतं, जलाटनी-समुच्छलनैः हासयितमिति स्मरणीयं कृतम्।

ब्राह्मणेन वार्यमाणोऽपि, सूर्येऽस्तङ्गतेऽपि गोधूलिसमुच्छ्रितेऽपि रक्ताभेऽपि पश्चिमनभसि, तुरुङ्वसतिं समागतो यतो हि ब्राह्मणेनोक्तमासीद्यन्मदीयं गन्तव्यमपरं नाम्चीमन्दिरं क्रोशद्वादशीमतिक्रम्य, दुर्गमपद्धतिभिः, विना सेतुं नदीपारगमनैः स्थलौकोभिः जलौकोभिः नैव नवयात्रिणा मया गमनीयमिति। अत एव रङ्पोमल्लीजोर्थाङ्मार्गेण नाम्चीपुरं गन्तुं नीचैस्तः न्यवर्तयम्।

रात्रौ तुरुङ्ग्रामे रानापालिमहोदयस्य निवासेऽस्वपम्। तद्गृहं खलु पर्वत-कोणे ग्रामस्य कोणे, मार्गस्य च कोणे वर्तते, यस्य सम्मुखमुपरिष्टात् क्षेत्राणि, पृष्ठतश्चाधस्तात्क्षेत्राणि वामतो दक्षिणतश्च क्षेत्राणीति क्षेत्रनिवासो विहितः।

आदिवसं बुभुक्षुः तत्र प्रथमं दुग्धौदनं तदनु शाकमिश्रं दध्योदनं भुक्त्वा सत्यं यात्रा सफला कृता। रात्रौ प्रथमप्रहरे गीतगोष्ठी समारब्धा। प्रायः दशभिः गीतैः रसपूर्णा रात्रिः सुस्वप्नादपि हीना मधुरनिद्रया व्यतीता।

प्रातराशानन्तरं चन्द्राभ्रात्रा सह तुरुङ्ग्रामतो रङ्पोपुरं, शनैः शनैः पर्वतशिखरादवतरन् मुहुर्मुहुरुच्चैः स्थित्वा नदीधारं दर्शं दर्शं, स्मारं स्मारं च गरुडपुराणवर्णितं यममार्गवर्णनं प्राप्तः। रङ्पोपुरतः जीपयानेन मल्लीपुरं समायातः। जीपयाने चलति ख्रीष्टानुयायी कश्चिदीशपरः पुरोहितः ईशानुया-यित्वं व्याख्यातुमारभते। 'शान्तिप्राप्त्यै ख्रीष्टानुसरणमेव पन्था' इति तस्या-भिमतम्। स्मरामि यत्तुरुङ्ग्रामे प्रातःकाले देहलीतः आकाशवाणीप्रसारणेषु

'चतुर्थी शान्तिप्राप्तिः ईशानुयायिभिरनुभूयत' इति श्रुतम् । तदेवानेन प्रारब्धम् ।- न जाने कथं हि जनाः जीवन्तं साक्षादुपस्थितं मनुष्यं स्वजातीयं प्राप्यापि मृतगाथाः गायन्तः तमवहेलयन्ति । धन्यम्मन्याः ते जीवन्तु, अहं हि जीवन्नस्मि मनुष्यः तेष्वेव जीवितुञ्चेच्छामि । नास्ति मयि पारेलोकं गतेषु रुचिः । नास्ति मयि अलौकिकचर्चाव्यवसायेषु प्रावीण्यम् । नास्ति मयि सम्प्रदायबन्धेषु कश्चिद्व्यामोहो यतो हि त एव जनाः ये लोकं द्वन्द्वोत्पादविधिना कदर्थयन्त इव निर्भर्त्सयन्ति ।

इत्थं हि श्रावं श्रावमीशचर्चां रङ्पोतो मल्लीं प्राप्तः । मल्लीपुरं रङ्पोपुरमिव द्विधा विभक्तं वरीर्वति । तीस्तानद्याः वामतो भारतीयं दक्षिणतश्च सैक्किमम् । तत्र सेतुना भारतीयान्मल्लीपुरात् सिक्किममल्लीपुरे प्रविष्टः ।

तत्रस्थैः राजपुरुषैः द्योतितोऽस्मि यदस्ति सिक्किमराजकीयवाहनस्थानं वामतो, दक्षिणतस्त्वापणमात्रं वर्तते । अस्तु, प्रथमं वामतः वाहनस्थाने सामग्रीं त्यक्तुं गच्छामि । तत्पश्चात् किञ्चिदुदरपूरणाय दक्षिणत आपणं गच्छामि । अत्रैव दृष्टं यत् पर्वतप्रान्तेषु लोकस्तथा स्वस्थो यद्धि नैव कश्चित् कस्यचिदपरस्य सामग्रीम् इतस्ततोऽसुरक्षितामपि स्पृशति । सर्वे हि स्वसामग्रीं स्कन्धाधारेषु धृत्वा गच्छन्ति । पुनश्च स्वकीया एव सामग्री तथा भारं बिभर्ति यद्धि जिघृक्षन्नपि कथं नीयेमिति परित्यजत्येव ।

घटिकानन्तरं ट्रक्यानमेकं समायातम् । चालकेन अस्माकं पुरत एव भूयसी मदिरा पीता । यद्यपि सिक्किमदेशे समग्रोऽपि लोको मदिरां पानीयमिव पिबति, तथापि जीपदुर्घटनापीडितदेहोऽहं मदिरामदघूर्णितनेत्रकेण चालकेन सह यात्रायां सत्यमुद्विग्नमनाः सञ्जातः । किन्तु किं कार्यम् ? यदि यानं त्यजामि तर्हि, न जानेऽन्यद्यानं कदा आगमिष्यति । नास्ति निश्चिता यानगतिः । कथमपि चिन्तितमना घण्टाद्वयेन मल्लीतो माझीटारपुरं प्राप्तः ।

माझीटारपुरसकाशं वर्तते कश्चिद् धवलमन्दिरे धवलो वुद्धः । न कश्चिद्ब्राह्मणस्तत्र दृष्टः । ततो पदातिरेव यानं प्रतीक्षमाणो घटिकया जोर्थाङ्पुरं प्राप्तः । जोर्थाङ्पुरे ज्ञातं यन्नाम्चीकृते न किमपि यानमद्य गन्ता । श्वो मध्याह्ने

राजकीयं यानं गमिष्यति। अस्तु, चतुर्वादनवेलायामेव तत्र सूरजविश्रामालये सामग्री निहिता।

रिक्तपाणि: पदातिरेव चतुर्दिक्षु इतस्ततो भ्रमितुमारभे। तत्र दृष्ट सिक्किमराजकीयवित्तालय:। काष्ठभवने मण्डप इव पटनाट्यशाला दृष्टा। चतसृषु दिक्षु उन्नता: पर्वतशिखरेषु पादपा:, उपत्यकायां पुन: रङ्गीतनद्यो सङ्गमस्थले विराजमानं जोर्थाङ्पुरम् इति विचरन्नस्मि।

पर्यटन्नेव सङ्गमभूमिं गच्छामि। अद्य प्राय: सार्धमेकं वर्षं व्यतीय बालुका णान् पश्यामि। अत: पूर्वं मद्रासपुरीपरिसरेषु सागरतटेषु नारिकेलकानने बालुकाभूमिं दृष्ट्वा, प्रमुदितचेता: समभवमिति स्मरामि। तथैवाद्याप्यनुभूयते उत्फुल्लमना सङ्गमस्य प्रयागभूमौ गङ्गायमुनयोरिव सादृश्यं पश्यामि। एका न वर्षाजलं नयन्ती धूलिकणै: सम्मिश्रा धूलिवर्णा, अपरा च शुद्धजलत्वात् नीलवर्णा अत: सङ्गमरेखा स्पष्टं खचितेव दृश्यते। तत्रैव शिलातले उपविश्य, चरण सङ्गमरेखायां निधाय अंगुलिभि: रेखां निश्चित्तां कर्तुं व्यर्थमेव प्रयते।

पृष्ठतो हि पश्यामि यदजानता एव मया बालुकाभित्तौ 'कारण' इति अक्ष राणि लिखितानि। चिन्तयामि यत्कथमेतल्लिखितम्। पुनश्चात्मानं सान्त्वया यदत्र धूसरनीलवर्णयो: सङ्गमस्थाने मेले सत्यपि रेखया पृथक्सत्ता द्वयोरपि सूच्य एवेति इत्थमेव भिन्नवर्णानां मेले सत्यपि संयोगात् तयो: मेलस्थल एव पृथक्करण रेखा जरीजागर्ति। इत्थमेवायं लोक:।

साम्प्रतं दिनमणि: सत्यमद्य अस्ताचलपटलस्य पृष्ठे निगूहन्निवात्मा निमज्जति। निरभ्रे नभसि पश्चिमा दिगियं ताम्रवर्णा नीलस्रोतसि बिम्बित कमपि अलौकिकमानन्दं जनयन्ती सङ्गमरेखां ज्वलदग्निरेखासन्निभां रञ्जयन्त सत्यमत्र रञ्जितयो: नदीद्वययो: सङ्गमरेखारञ्जनेन रञ्जिताभिधानं सार्थ करोति।

नदीगह्वरमार्गेणान्धकार: शनै: शनै: रञ्जितनद्यो: रञ्जितशाटिकयोश्चूलिका सत्यमद्यावतरति। किं कुर्यामत्रान्धकार इति चिन्तयन्नेव तूष्णीमुत्थाय नदीकूल मनुसृत्य सेतुना नदीं विहाय विश्रामालये आगच्छामि। मार्गे एव भोजनेन तृ किमपि लिखन्नहं गायितुं प्रारब्धोऽस्मि।

पश्यामि यदत्र मदीये कक्षे त्रयः सिक्किमवासिनोऽपि शयाना, मां प्रतीक्षमाणाः, धूमं पिबन्तः, परस्परं चर्चायामपि किमपि गूहन्तः, परितः छन्नगात्राः वर्तन्ते । तैरावेदितं यत्पटनाट्यमण्डपेऽद्य 'भगवान् परशुराम' इति पटनाट्यं विद्यते । तत्र सहैवास्माभिः गन्तव्यम् । अहमपि रात्रिं मनोरञ्जनेन नेतुं निश्चीय तैः सह पटनाट्यं द्रष्टुं तत्र गतः ।

तत्र पटनाट्ये सम्यगभिनीतं दृष्टं यद्गायत्री सहस्रबाहुजा परशुरामस्य प्रेयसी कुमारी चाजीवनं वीर्यरक्षाव्रतत्वात् परशुरामं नैव परिणीय सहस्रबाहुहता म्रियते । श्रूयते च यत्परशुरामस्य प्रियतमं छन्दो गायत्री नाम । गायत्रीसाधनयैव परशुरामो भगवत्त्वमवापेति । तत्र गीतं गायत्रीमन्त्रस्याद्यापि कर्णयोर्गुञ्जति यद्धि—

ॐ भूर्भुवः स्वः ।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।। इति ।।

भवतु, अहं हि मन्त्रसाधनां वृत्तेन सम्यक्कीलयित्वा करोमि । यद्धि—

"ॐ भूर्भुवः स्वः ।
तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ।
धियो यो नः प्रचोदयात् ।
स्वर्भुवभूः ॐ ।"

भवतु, अद्य प्रथमवारं काष्ठपटनाट्यशालायां, रिक्तप्रायायां पटनाट्यं शयानेन मया समनुमोदितम् ।

ततश्च निवर्त्य सर्वेऽपि पिपासया बाध्यमानाः पानीयमन्विष्यन्तः विश्रामालयवन्तं आह्वयितुम् आरभन्त । पानीयं पीत्वा सर्वेऽपि शेरते ।

अहह ! अत्र ऊष्मा असह्यप्राया । कार्पासिकमपि अवधार्य शेरते सर्वे । अन्धकारपूर्णे सति मशकगानं श्रूयत अतः प्रज्वलत्येव विद्युद्दीपे स्वपितुं सर्वे निश्चिन्वन्ति । अद्य स्वेदप्रवाहात् न सुखमस्वपम् । इतस्ततः कदाचिद्वामकरवलेन कदाचिद्दक्षिणकरवलेन शयानः, कदाचिदुदरवलेन पुनश्च कदाचित्पृष्ठवलेन

पीडितदेहो, आरात्रि नाजागरं न वा स्वप्नमपश्यं न च वा स्वस्वपम् । कयञ्ज वृत्त्या आसमिति अहमेव जानामि । नैव वर्णयितुं सा शक्या ।

प्रातःकाले मनाग्विलम्बेन उत्थाय प्रथमं रूप्यकाणि निरीक्षितानि तद्न सामग्र्यः । सर्वं तथैव प्राप्तं यथा रात्रौ निहितम् ।

किं करोमि । समतलभूमिनिवासी ह्ययं जनो बिभेति चौरेभ्यः । तत्र क्षणं नेत्र निमीलनादेव सामग्री पलायते, वक्षोनिहितमपि रूप्यकं कृन्तनीभिः कुत्र याति, कश्चिज्जानाति तर्हिचतुर्षु जनेषु सुप्त्वापि सर्वं तथैव प्राप्तमत्रेति सत्यमाश्चर्यम् ज्ञायते यदलिखित एवासौ नियमबद्धः पर्वतीयानामाचारो नितरां स्वर्गराज्यं त्रैविष्टपं स्मारयति । परद्रव्यमपहर्त्तुं नैव कस्यचिदपि मनसि विचाराः विजृम्भन्ते अत्र दृष्टं यन्नैव लोकः सम्प्रदायेषु बध्यते । भोजने स्वतन्त्रो लोको नैव कदापि 'इदं भोज्यमभोज्यं वेदमिति चिन्तयति । वस्त्रेषु स्वतन्त्रो लोको यत्किमपि प्राप्नोति तदेव परिदधाति । विवाहे स्वतन्त्रो लोको यथाकथञ्चिदपि स्वतन्त्र विहरति । सत्यमयं गन्धर्वलोकः ।

भवतु अद्य ममापि चित्तं साधु, कल्मषशून्यं सुप्रसन्नं विभाति । किमपि खादयित्वा कदलीफलमिष्टं, किमपि लिखित्वा यात्रानुभूतं, किमपि च चिन्तयन् पुत्रीजातं विश्रामालय एव तिष्ठामि । तत्र गान्तोकपरिचितो सिक्किमराजपुरुषः मम सकाशमागत्य सूचयति यदसौ क्वापि मयि लब्धपरिचयः । तं द्योतयामि यदावां बालयोगेश्वरगोष्ठीषु परिचितौ । सः स्मरति मदुक्तस्य योगचर्याव्याख्यानस्य, सहसैव अध्यक्षत्वेन वर्तमानायाः साध्वीवृद्धायाः अनुज्ञया दत्तस्य । स्मर्यते मया यत्ताभिः ज्ञातमनोवृत्तिभिः परिचितत्वाद्विस्मितो बभूवायं जनस्तस्मिन् दिवसे । कासु कासुचित् किमपि चर्चासु विचरतोरेव कालः सम्यगतीतः । पश्यामि यन्मध्याह्ने द्वादशवारं घण्टा वदति सूचयति च यन्मात्रं घण्टार्धं यानप्रयाणे । विश्रामालयात् राजकीययानस्थानं प्राप्नोमि ।

याने चालकस्य पृष्ठतस्तिष्ठामि । चालकस्य वामतो भूटियाबाला तदनु कश्चित् सिक्किमदेशीयः तदनु तस्य पत्नी तदनु च सुप्रसन्नवदनो यानसञ्चालकः । असौ यानसञ्चालको भूटियाबालया यान एव परिचेतुमिच्छति । बाला च

ज्जमानापि मुखरं परिचाययति । तौ तावान् मुखरौ यद्धि सर्वैरपि यात्रिभिः यमानौ श्रूयमाणौ दृश्यमानावपि हस्ताहस्तिभिः नखकृन्तनैः चुम्बनविडम्बनाभिः केलिं कुर्वाणौ निगूहनैरेव प्रकटानुभावौ, विरोधैरेव स्नेहं प्रदर्शयन्तौ लतः। सञ्चालकः मम वामतो भूत्वा वालायाः पृष्ठतस्तिष्ठति । अत्र खलु यानवसरः केलिकृते, प्रायः जिह्वालेहनादिकैः कर्णपीडनैः स्तनमर्दनैः केशकर्ष-रुच्चैर्हासैः प्रचरति । सञ्चालकः शीटिकया प्रेमगीतानि गायन् समग्रमपि ानमान्दोलयति ।

मार्गे कस्मिंश्चिन्निर्भरकोणे यानं पिपासया विरमति ! तत्र सञ्चालको बाला अवतीर्य यानात्, केलिपरौ पानमिषेण, कूजन्तौ हासमिषेण गायन्तौ विरोध-मिषेण, परस्परं स्पृशन्तौ वारणमिषेण परं शुशुभाते । सत्यं पटनाट्येषु तुल्य-क्रीडा अद्यावधि मया कल्पना चिन्तितासीत् । अद्य यथा हि अपरिचितौ द्वौ कस्मादेव परिचितौ, स्वच्छन्दं केलिपरौ सञ्जातौ यानयात्रिणां सम्मुखम् एव, त्सर्वं दर्शंदर्शं पटनाट्यचित्राण्यपि मर्यादाग्रथितान्येव मन्ये । यतो हि तेष्वपि तादृश उन्मुक्तहासः, उन्मुक्तविजृम्भणमुन्मुक्तकेल्यादिकानां वा भावः दर्श्यते यादृशो गन्धर्वलोके मानवयोः साक्षाद् दृष्टः । पटनाट्येष्वपि सर्वं क्रीडादिकं प्रतीकैः, पृथक्त्वा सम्पाद्य प्रदर्श्यते, किन्त्वत्र सर्वं साक्षादेव ऋजुरूपम् ! अहो । मार्दवमार्जवं निर्ग्रन्थत्वं च गन्धर्वलोकस्य हिमालयक्रोडस्य सिक्किम-देशस्य । एतदेव दर्शं दर्शं विधात्रात्र निर्भराः निर्मिताः, स्रोतस्विन्यो वाहिताः, शिलातलानि घटितानि, कुञ्जवीथ्यो रचिता इति त्रैविष्टपो लोको घटितः ।

नाम्चीनगरात्पूर्वमेव स्वस्थाने वाला यानादवतरति । सञ्चालक उदासीनो भवति । किञ्चित्कालानन्तरमसौ मदीयां मुरलिकां झोलाविधृतां वीक्ष्य सान्त्व-यन्निवात्मानं तया गातुं मामागृह्णाति । परन्तु न जानाति स यन्मुरलिकाधारणं वादनञ्च सर्वथा भिन्ने वस्तुनी । इत्थंप्रेमवैकलीपरिश्रान्तेन तेन सहालपन् नाम्चीपुरं समागतः ।

सद्य एव सिक्किमखादीभण्डारापणे सामग्रीं निधाय नाम्चीमन्दिरं [यद्धि हट्टकात् क्रोशेन वर्तते] गत्वा ब्राह्मणान् दिदृक्षुरुत्सुको भवामि । क्रोशं दूरे, सहस्रद्वयमात्रम् उच्चैः गत्वा साम्प्रतं शीतमनुभवामि । स्यात् सहस्रचतुष्टयी नाम्चीनगरस्य उच्चता सहस्रषट्कं पुनः मन्दिरस्य ।

तत्र मन्दिरं पिहितकपाटं दृश्यते। मनाग्विलम्बेन ब्राह्मणी समायाता सा वृद्धा वलीचिह्नितगात्रा स्थूलकाया स्मितवदना [कुञ्चिकाभिः अनुमितं दूरदर्शनेति] सम्प्राप्ता। मन्दिरं प्रदर्शयन्ती सूचयति यत् सर्वेऽपि ब्राह्मणाः (? बहिर्गताः। नाद्य तैः मिलनं सम्भविष्यतीति निवर्ते। मया सह सिङ्तामख भण्डारस्य प्रबन्धकः कृष्णबहादुरोऽप्यायाति।

मार्गेऽवतरता मया आश्चर्यचतुष्टयं समवलोकितम्। प्रथमं शीतलहरी पीडिता अपि हरिणाः चित्रितगात्राः प्रफुल्लवदनाः दर्भाङ्कुरचर्वणहरितावर्ति पर्वतदर्शनलालसचञ्चलनयनाः पिपासवोऽपि सरसौष्ठाः विभान्तीति। द्वितीयं खलु शीतक्षेत्रेऽपि नग्नकाः अवनतरोमराजयो बालकाः युवानो वृद्धाः साधुवृन्दाः तृतीयं हि आदिवसं नीहारकणवर्षाक्लिन्नशष्पा काननभूमिरपि आतपेन वाष्प त्पादयित्री, जम्बालेन जलौकोवर्धयित्री, उच्चावचतलेन भूतरक्षयित्री, भल्लू बाहुल्येन शरणदात्री सततं सुशोभेति। चतुर्थं पुनः सततं वर्षमाणेष्वपि मे पर्वतभूमिषु नितरां जलाभावः। यत्र तत्र स्रोतस्विनीषु कुल्यासु जलं प्रवह निर्झरेषु गर्जति किन्तु केदारेषु शुष्कमन्नशष्पं, नीहारोऽपि मेघरूपो धावति कि पेयं स्नेयं स्पृश्यं वा जलं दृश्यमपि न, जलाटनी स्थलेष्वपि धावति, जं गच्छत्यपि नेत्यादि। जनाः क्रोशं गच्छन्ति जलं वोढुं, किन्तु विनैव धातुपात्र वंशपात्रमेवात्र जलपात्रम्। विशालो वंशराशिः। वंशेभ्य एव पर्वत्रयं पर्वचतुष्ट वा गृहीत्वा, अन्तःपर्वाणि अपवार्य. अन्तिमं पर्व पात्रतलमिव विधाय, मुखं कलमसदृशं तिर्यक्कृत्य जलपात्रं जलं वोढुं निर्मिण्वन्ति। तानि पात्राणि पोट दामभिः पृष्ठेषु निधाय बालाः क्रोशं क्रोशद्वयं वा वहन्ति जलानि। अत प्रायः केदाराः कुल्याकूलेष्वेव दृश्यन्ते, पादपाः तटेषु राजन्ते, घासश्च सर्व (शिलातलं विहाय) प्राप्यते, जलौकसः सर्वत्र शिलास्वपि भ्रमन्त्यो दृश्यन्ते अत्र जलौकसः मुखपुच्छाभ्यामेव प्लवन्तो धावन्ति।

इत्थं नाम्चीहट्टकं प्राप्य, किञ्चिद् विश्राम्य विद्यालयभूमिः कन्दुकक्री भूमिश्च दृष्टे। कदलीफलं भुक्त्वा लिखंस्तिष्ठामि, यतो हि खादीभण्डारवासि मांसभुजः पृच्छन्ति मां यद्धि 'कः भोजनप्रबन्धो भवत' इति फलेभ्य एव सन् ष्यामि।

एतस्मिन्नेवान्तरे कश्चित्परिचितो वृद्धः सूचयति मां यदत्र वूमूतारमन्दिरस्य
काशं कश्चिद् न्यायाधीशो (S. D. O.) मृतः। श्वो भविष्यन्ति तस्य
त्योरनन्तरं विधानानि। मयि पृष्टे सः कथयति यदहमाज्ञप्तो भविष्यामि
न्त्येष्टिकर्मकाण्डकाले मन्त्रोच्चारणादिकं वाक्पिटके निधातुमिति।

भवतु, रात्रौ द्वारि सम्पाद्यमानानि दुर्गापूजाविधानानि समुल्लाससज्जा-
र्तनादिकानि हवनञ्च पश्यामि। तत्रत्यैः स्थानीयैः जनैरालपन्नेव आनिशीथं
ष्ठामि। प्रसादं भुक्त्वा शये।

अद्य रात्रौ भूमिशयनं विहितम्। तदपि, कक्षपिटके, यत्र शयनभूमिः न्यूना।
न पादविस्तारणेऽसमर्थो वामदक्षिणपृष्ठोदरादिबलैः शिरः पादं वोत्थाप्योत्थाप्य
थमपि निद्राजागरस्वप्नेषु वृत्तमिवानुभूय रात्रिर्व्यतीतेति प्रातः श्रान्त एव
कामपीडित' इव उत्तिष्ठामि।

प्रातरुत्थाय केवलं चेयं पीत्वा सूर्यरश्मीन् दृष्ट्वैव न्यायाधीशगेहं गत्वा
कस्मिन् कोणे तिष्ठामि। महानयमवसरो, यद्धि मृतकसंस्कारान् बौद्धान् स्वयं
क्ष्यामीति। मा हि पूर्वाग्रहग्रस्तचित्तदोषात्तदात्मीयानां दर्शनाद्यवसरो विलम्ब्येतेति
भगवन्तं चन्द्रमौलिं प्रार्थये।

'ब्राह्मणोच्चारितान् मन्त्रान् वाक्पिटके ग्रहीष्यामीति विज्ञाय सर्वैः सादरं
माहूतः शवकक्षे प्रविशामि।

तस्मिन् कक्षे उदीच्यां पद्मासनबद्धस्य न्यायाधीशस्य शवो मन्दिराकारे
वरपिटके तिष्ठति। पश्चिमायां पूर्वाभिमुखास्त्रयो ब्राह्मणाः दक्षिणायाञ्च
दीच्यभिमुखाश्चत्वारो ब्राह्मणाः मृतकमाह्वयन्तः तिष्ठन्तः सन्ति। तेषु मुख्यो
ह्मण उद्धृतकर्पटचूडो मयि गम्भीरदर्शनं पश्यति। किञ्चिदुन्निरीक्ष्य
मामाज्ञापयति वाक्पिटकग्रहणं प्रारब्धुम्।

नावगच्छतापि मया पश्चात्प्रयोगाय तत्सर्वमपि सवाद्यं श्रुतं गृहीतञ्च।
द्य एव शवपिटकं गृहान्निष्कर्ष्य बहिः स्थापितम्। समन्त्रकं, यथा

हिन्दव-स्तथैव, बौद्धा अपि चरन्ति । सत्यम्, अस्ति तयोः मन्त्रेषु
क्रियासु भेदः, चर्यासु भेदः, किन्तु विद्या प्रायः समानैव । तथापि यथा प्र
मन्त्राः प्रयुज्यन्ते सशङ्खतूर्यमृदङ्गजङ्घास्थिडमरुकादिकाः, तेनेत्थं प्रतिभाति
मृतकमात्मीयमेवान्यत्र गन्तुमुद्यतं मन्यन्ते, नान्यथा मृतमुपरतमधि
हीनादिकं वेति ।

अत्र पुरोहितेन मरणपत्रिका निर्मिता । यथा हि भारतवर्षे जन्मपत्रिक
कुण्डली निर्मीयते तथैव त्रैविष्टपेषु बौद्धेषु मरणपत्रिकया अन्त्ये
संस्कारविधाः, पुनर्जन्मस्थानकालादिकञ्च निर्णीयते । तदत्र निर्णीतं यद्दक्षिए
दिशि स्थानेऽमुके श्मसानचर्या विधेया । तत्स्थानं खलु नाम्चीपुरतः चतुर्षु क्रो
विद्यते । शवयात्रायामहमपि गच्छामि । क्वचिदुच्चैः क्वचिन्नीचैः क्वचिद्वा
क्वचिद्दक्षिणतः वामपटके स्थाने स्थाने मन्त्रान् गृह्णन्नेव प्रयामि । मेघच्छन्न
नभसि निर्वर्षे शीतमनुभवन्नपि स्वेदधाराभिः नेत्रकपोले सिञ्चन्नेव मार्गं नया
पिपासुः स्रोतसां पाथः पिबामि किन्तु बुभुक्षुः शान्तिमेव खादामि । अत्र
मलामिनो (शवयात्रिणः) मुदा खादन्तः पिबन्तश्च मांसं मदिराञ्च नृत्यन्तो य
किन्तु निरामिषो हिन्दूब्राह्मणोऽहं विजयादशम्यां सत्यमेकादशीव्रतमनुपालय
शुष्काधरनेत्रपादो गच्छाम्येव शोधयात्रायां शवयात्रायाम् ।

कुतश्चिच्चिन्तयामि निवर्तनवेलाया अन्धकारकालम् । मध्याह्ने हि त्रिप
गान्तोकतो नाम्चीपुरमागत्य मामन्वेषयिष्य । परिश्रान्तो भवामि मा ह
मामप्राप्य निवर्तेतेति । इत्थं चिन्तयन् चिताज्वलनादनन्तरं सत्वरमेका
भल्लूकनिचिते कान्तारे नाम्चोपुराय प्रचलामि !

सन्ध्याताम्रे नभसि नाम्चीपुरमागत्य खादीभण्डारे ज्ञातं यन्नासौ त्रिप
समागत इति । शोचामि तस्य सिक्किमालङ्कारालयविद्युदभियन्तुः (Sikk
jewels engineer) कार्यव्यापृतत्वादिकवैवश्यं, विजयादशमोसमुत्सुक
जनसम्मर्देन, हेतुना यानग्रहणदौष्कर्यं, समागन्तव्ययानानां सर्वेषां सिङ्तामपु
समागमनसूचनया तस्य वैवश्यञ्च । निश्चिन्तो भवामि तस्यानागमने, चिन्ता
च भवामि जीपदुर्घटनास्मरणेन ।

नितरां बुभुक्षुः प्रतीक्षाविलम्बभयात् तत्रैवापणे गत्वा कदलीफलानि क्री

दुग्धेन सह कवलीकृत्य यावत्खादीभण्डारमागच्छामि तावत्पश्यामि यत्त्रिपाठी परिश्रान्तः प्रस्रवत्स्वेदधारः सद्यःप्राप्तस्तत्र मामवलोकयंस्तिष्ठति ।

तं सत्वरं भोजयित्वा, विजयादशमीसदवसरीकरणाय मिष्टान्नं वितीर्य, काष्ठदोले च चलित्वा विश्रान्तमार्गश्रमेण त्रिपाठिना सह खादीभण्डारं न्यवर्तयम् । पृथङ्मार्गकथाः परस्परं गायन्तौ शृण्वन्तौ चावां भूशय्यायां कम्बलविष्टरेण स्वस्वपाव ।

असौ त्रिपाठी प्रातरद्यैव सप्तवादनवेलातः यात्री समभवत् । यानेन गान्तोकात् सिङ्तामूपुरं समायातः, विजयादशमीहेतुना सिङ्ताम्नाम्चीमार्गे नैकमपि यानं तेनोपलब्धम् । अतः क्रोशदशी तेन पदातिनैव चलिता स्यात् यदि तिमीहट्टके चेयवाटिकापालेन केनचिदाङ्ग्लेन स्वकीयं जीपयानमनुकम्पया न दीयेत चेत् । भवत्वद्य, सुप्रसन्नावावां सुखमस्वपाव ।

अद्य प्रातरुषः काल एवावां जागरितौ । बहिः निष्क्रतोऽहं तिग्मांशुमरुणवर्णं प्राच्यामुदयाचलशिखरस्थं, काञ्चनजङ्घाशिखरं च अपश्यम् काञ्चनाभं पश्चिमोत्तरान्तरिक्षे शोभमानम् । अयं प्रथमो दिवसः काञ्चनजङ्घाशिखरं प्रातररुणाभं यद्दृष्टं मया । सद्य एव त्रिपाठिनमाहूय तद्दर्शयामि । प्रतिक्षणं परिवर्तमानवर्णसंयुतं काञ्चनजङ्घाशिखरं प्रथममरुणाभं तदनु ताम्रवर्णं तदनु रजताभं बिम्बसंयुतं च क्रमशः पश्यन्तावावां चित्रपिटके चित्राणि तान्यविस्मरणीयानि प्रथमदृष्टानि अङ्कितानि कुर्वः ।

खादीभण्डारं समागत्य ज्ञातं यन्नाद्य नाम्चीतो जोर्थाङ्पुरं (येन गेज़िङ्पुरं गम्येत) किमपि यानं गन्ता । अतः सत्वरं चेयं पीत्वा आवां पदाती एव चौरपथा (**चोरबाटो**) ऋजुमार्गेण गेजिङ्पुराय प्रस्थितौ । स मार्गः सिकिप्सेतुना मध्येमार्गं जोर्थाङ्गेज़िङ्राजमार्गे मिलति । अत एव चिन्तितं यत्सत्वरं गमनेन राजमार्गं प्राप्य यानं किमपि प्राप्येत चेत्, आवां सुखं गेज़िङ्पुरं प्राप्नुयावः । इयमेव तात्कालिकी विधा चिन्तिता सद्योगमनाय ।

अज्ञातमार्गावावां केवलं राजमार्गदर्शनात् तदेवोद्दिश्य तस्यां दिशि प्रस्थितौ । क्रोशमेकं गत्वा पश्यावो यत् चौरमार्गः समाप्तो द्विदलक्षेत्रेषु । किं कुर्वः कुत्र

गच्छावो, निवर्तावो वा पुनः नाम्चीपुरमिति चिन्तयद्‌भ्याम् आवाभ्यां निश्चि यत् नवीनेन मार्गे निर्णीय विनैव पद्धतिं नीचैः पुरोदृश्यमाने चौरमार्गे गच्छावस्त च गत्वा तेन मार्गेण सिकिप्सेतुं च प्राप्स्याव इति। साहसिनावावां विने पद्धतिं मध्येक्षेत्रं मध्येकाननं मध्ये च जलौकःस्वर्गं गच्छावः।

प्रातरवश्यायकणैः परिधानानि पादयामितकानि (Pants) सामग्रीभोलाश्च क्लिन्नतया शीतमनुभावयन्ति। कृष्टक्षेत्रत्वात् श्लथरचनाके भूमितले पतन्तावेवा चलावः। प्रतिक्षणं उपानत्सु पादयामितकेषु च धावन्तो विंशतिशो जलौकः लब्धपूर्वानुभवा इव, शिक्षिता इव शरीरं जिघ्रन्तो मांसमेव धावन्ति। प्रतिपरि च शिलातलमन्विष्यावां जलौकसः अङ्गुलिभिः धृत्वा क्षिपावः, अग्रे च पदं सरावः। त्रिपाटी खलु द्विदलफलानि गृहीत्वा खादन् गायन् हसंश्च मामनुकृ उत्साहेन पृष्ठतो मामनुसरति।

सहसा समुद्दिष्टचौरमार्गपद्धतिः नीचैः शतद्वयमात्रके दूरे साक्षाद्भव पर्वतभूमिश्च पतिता लम्बमानेव पञ्चाशदुत्तरशतकोणं निर्माय पतन्तीव सम्मु दृश्यते। साम्प्रतं यदि आवां निवर्तावः तर्हि क्रोशचतुष्टयं निरर्थकमेव भवति यदि वा तिर्यगुत्थाय गच्छावः तर्हि क्रोशत्रयं पुनः यात्रा भवति, यदि च तिर्यक्पर्वतभूमौ सरावस्तर्हि स्यात् सद्यः पतनेन मृत्युमपि आलिङ्गने विभावयाव इति। आवाभ्यां निश्चितं यच्चन्द्रमौलिनाम स्मृत्वा साक्षात्सरावो जीवावो वा मरावो वा किन्तु अन्यथागमनेन कातरौ न भवाव इति। इत्थं प्रारम्भ एव यात्रायाः हसद्‌भ्यामावाभ्याम् आनन्दमयी यात्रा अदृश्यकाठिन्ये विभाविता चन्द्रमौलिक्रोडसमर्पणीकृता।

साम्प्रतं सरन्तावावां परस्परं मार्गनिदर्शनेन, सामग्रीपरिवर्तनेन, नी गत्वा उपरिस्थितस्य पादाधारप्रदानेन गच्छावः। विष्टरे साक्षात्प्रक्षिप्ते। वस्त्र मात्रनिहितभोलापि प्रक्षिप्तः। वाचिपटकभोलामात्रं मया वामकरे विधृतम् नास्ति कश्चिद्वनस्पतिः घासः शिलाशकलं वा मार्गे यो हि आधारः स्यात् घृष्ट सरणेः। बालुकापटले मुष्टिके प्रचोद्य (एँड़ी) पादतलमूलं च तथैव वालुकापट लम्बमाने प्रचोदयन् त्रीणि चत्वारि वा पदमात्राणि विनैवाधारमधस्ता भारवशात् पतन् भाग्यवशात् शिवानुकम्पया कथञ्चित्क्वचिदाधारे स्थित्व

प्रतिक्षणं चिन्तासाहसाभ्यां जिजीविषामरणभययोरन्तराले चरन्नुत्पतन्नहं गच्छामि । जाने, त्रिपाठी अपि इत्थमेव चलति इति । यतो हि नास्त्यन्यो विधिरत्र चलनस्य ।

मार्गोऽयं तत्रत्यया वालिकया अधस्तात् पादपमूले स्थितया द्योतितम् उक्तं च यन्नात्र कश्चिज्जीवितोऽद्यावध्यवतीर्णः । आवां हि कतिधा धन्यवादान् वितरन्तौ आश्वस्तौ स्व इति नास्ति द्योतनविषयः ।

स्मरामि कस्यचिदन्यथाहासविषयस्य घटकस्य । वस्त्रझोला पतन्नेव सामग्री-रिक्तः समभवत् । साबुनपिटकमन्यत्र साबुनञ्चान्यत्र वस्त्राण्यन्यत्र जलपात्रमन्यत्र मिष्टान्नानि पाथेयानि सेबफलञ्चान्यत्र, सर्वं लुण्ठदेव यत्र तत्र न्यपतत् । क्षुल्ल-कतीरे सम्प्राप्ते समतले सर्वमपि अन्विष्य पुनर्विघृतं । सेबफलं नैव अदृश्यत । स्वीकरोमि यत्पाथेयग्रहणकाले त्रिपाठिना समानीते फलमिष्टान्नादिके मम दृष्टिः सेबफल एव त्रुदितासीत् । तद्धि सुतरामभिलषितफलमित्थं लुप्तमदृष्टं वा भवितेति चिंतितमपि नासीत् । साम्प्रतं स्वलोलुपत्वमुपहसामि ।

प्राप्ते पद्धतिमार्गे जलौकसो बहिष्कृत्य पर्वतमारोहावः । तत्रैव कस्मिंश्चिद्-गृहपरिसरे सन्तरापादपः फलभरावनतो दृश्यते । त्रिपाठिना पृष्टो गृहस्वामी मिष्टौ फलानि रसपूर्णानि विना मूल्यं पथिकस्वागतमिव पाथेयमिव ददाति ।

पद्धतिमार्गः पुनरन्यत्र अज्ञाततया त्यक्तः । पुरोदृश्यमानं सेतुमुद्दिश्य पूर्ववदेव व्येकटिस्पर्शिघासवनं चरावः । कथमपि क्षुल्लकतीरमासादितौ पश्यावो यत् तुप्राप्त्यै उच्चैः गत्वा क्रोशचक्रेण मार्गः क्षुल्लकजलधारगतिश्च पादत्रोटनी वाहयिष्यतीति ।

भवतु, मयोक्तं यत्पारेगमनचिन्तां विहाय साम्प्रतं घटिकाद्वयं क्षुल्लकदृश्य-र्शनेन पाथेयमिष्टान्नग्रहणेन मधुरजलपानेन च सम्मोदयावः । तदा आनन्दितौ लब्धप्राणौ मार्गः पारेगमनाय प्राप्स्याव इति ।

सत्यं, मोदस्थानमेतत् सिकिप्नामधेयस्य क्षुल्लकतीरस्योपसेतु मध्येशिलातलं विश्रान्तपथिकविरामस्थलसम्भावनम् ।

सेतोरुपरिष्टात् पथिकत्रयं (स्यात् पिता माता पुत्रश्च) समायाति ।

तत्रच्छायायामेव विश्रामाय तिष्ठति । मयाहूतः पाणिप्रदर्शनपूर्वकं पुत्रो धावन्
क्षुल्लकतीरमनुसरन् आवां प्रति समायाति । पित्रा वार्यमाणोऽपि आगच्छत्येव
क्षुल्लकधारासु पारेतारम् आगन्तुं मार्गमन्विष्य शनैः शनैः अनुजङ्घं पानं
चलत्यपि कथञ्चित् पारं प्राप्नोति सत्यं, चन्द्रमौलिकृपायै समभिभूतचेतो
भ्यामावाभ्यां स बालकैः गुरुरेव समाख्यातः । समिष्टान्नसमर्पणं स बाल
नमोभिः पुनः निवर्तितः । मार्गो दृष्टः । घटिकाद्वयमानन्देन व्यतो
जलं पीतं, तेनैव बालकनिर्दिष्टेन मार्गेण कथमपि कथमपि स्थैर्येण चर
शिलापटलेषु निर्धारयन् गच्छामि । त्रिपाठी मामनुगच्छति । पारेक्षुल्लकं ग
तेन प्रमोदेन प्रफुल्लाभ्यामावाभ्यां क्षुल्लकधारपरिवेशेषु परस्परं मुखचित्रा
चित्रपिटके निहितानि । मया खेलतैव मुखे कृष्णमनुसरता वंशीवादनप
चित्रांकरणाय मुखमुद्रा विधृता ।

साम्प्रतं पारेक्षुल्लकं रञ्जितनदीमधिकृत्य निर्मिते सिकिप्सेतौ दृष्टि प्रक्षिप
तमेवोद्दिश्य चरावः । शङ्कमानचित्तौ कथञ्चिद्यावन्नदीतीरमाप्तौ तावत्पारे
शिलातलमेकं जलस्पर्शस्वर्गं सेतुच्छायाशीतलं स्नानयोग्यं दृष्ट्वा त
गच्छावः । लौहतारावृतसेतुदोलया सम्यगुच्छलन्तौ गायन्तौ स्मितिगीतिस्नि
पारेनदीं गत्वा शिलातले शयित्वा गोष्ठीसुखमनुभवन्तं मातङ्गी–(तितली
बालुकापीठे नीरशीतलं दर्शं दर्शं तथा प्रसन्नौ यथा हि तासां चित्रं विना चित्रपि
निरर्थकं कर्त्तुं नैव शक्नुयावः । पाथेयं च रञ्जितशीतलं पीत्वाऽहं मुरलिकावा
परः त्रिपाठी च गीतगायनपरः शिलातले शयानौ स्वः ।

ततो राजमार्गं समीपगामिनं प्राप्य गेजिङ्पुरमुद्दिश्य पदाती एव प्रचलि
क्रोशपञ्चकं पदातिगतं किन्तु न किमपि यानं प्राप्तम् । मार्गे हसन्तौ गाय
गाथाः कुर्वन्तौ, क्वचिदापणेषु चेयं पिवन्तौ. किञ्चिद्विश्राम्य पुनः प्रचल
क्वचिदुच्चैः क्वचिन्नीचैः, क्वचित् क्षुल्लकपानीयं मार्गवर्तिनं पायं पायं क्वचि
दर्शं दर्शं पर्वतलम्बनं निर्जनं वा कान्तारं पुनश्च श्रावं श्रावं भल्लूकसीत्का
पक्षिणां गानं प्रस्तरपातोत्पन्नरञ्जितनदीचीत्कारञ्चावां सूर्येऽस्तङ्गमन
लेप्सेक्हट्टकं प्राप्तौ ।

आपणमिदं सम्यगामोदस्थानं क्षुल्लकनद्योः सङ्गमशोभितं, सुधा

गेजिङ्पुरपर्वतपादमूले वर्त्तमानं विद्यते। तत्र किञ्चिद् विश्राम्यं ज्ञातं यदतो गेजिङ्पुरं पञ्चसु क्रोशेषु वर्तते। पुनश्च कृष्णा रात्रिः। आवामज्ञाताध्वानौ। अतो विना यानं नैव गन्तव्यमिति। चन्द्रचूडस्मरणविह्वलचित्तौ पश्यावो यद् जोर्थाङ्पुरतो यानं लेप्सेक्हट्टकं समासीदति। इदमपि ज्ञातं यदिदमेव गेजिङ्पुरं गन्ता। आवां तस्मिन् समासाद्य गेजिङ्पुराय चिटिकां क्रीत्वा च प्रसन्नौ प्राप्तौ।

अत्र सम्मुखमेव पेलिङ्पाठशालायाः अस्मद्गन्तव्याया अध्यापको मेरठजनपदनिवासी राणामहोदयः तिष्ठति। तेन परिचितावाश्वस्तौ स्वो यद्यथाकथञ्चिदपि अद्यैव पेलिङ्पाठशालापरिसरं प्राप्तास्वः। मुदा गेजिङ्पुरं प्राप्य, ग्रानादवतीर्य ओदनभोजनं कृत्वा राणामहोदयेन सार्धं पेलिङ्परिसरं समवाप्य स्वपरिचितस्य चन्द्रचूडशर्मणः सदनमासाद्य, तं च स्मितमुखं दृष्ट्वाश्वस्तावावां ःवस्वपाव।

रात्रौ व.ाहकाच्छन्नं नभो पृष्ट्वा चिन्तितोऽहमासम् :असौ त्रिपाठी रात्रिात्रप्राघुणक प्रातःकाले काञ्चनजङ्घाशिखरमदृष्ट्वैव न निवर्तेतेति। परन्तु र्पया हिमपातेन च निरभ्रं गगनं दृष्ट्वा प्रोत्फुल्लमना शिवस्मरणपूर्वकमुत्थाय र्योदयात्प्रागेव त्रिपाठी मया समाहूतो जागरितः। शर्मापि जागरितः समायाति। वतु, सुप्रसादो दिवसप्रारम्भः। कुक्कुटस्य 'कुक्कुङ्कूक्' ध्वनिः दिक्षु उपत्यकासु गृञ्जतितराम्।

अहो! काञ्चनजङ्घासौन्दर्यम्। पेलिङ्तः स्पष्टं शिखरहिमचूडा दृश्यते। षसि दुग्धधवलं भाति।

शनैः शनैररुणोदयेन सममेव शिखरमपि अरुणवर्णेनात्मानं रञ्जयित्वा तांसि समान्दोलयति। सूर्यो दृश्यते प्राच्यामुदितः। प्रथमं काञ्चनजङ्घामुकुटं किरणचरणैः स्पृष्ट्वा धन्यमिवात्मानं करोति। साम्प्रतं ताम्रवर्णं हिमकुटावलिदर्शनम्।

सूर्ये रजताभे सम्भूते हिमालयः पुनः रक्ताभो भवति। किं किं कथयामि।

सर्वमनुक्तमेव भवति हिमालयस्य सुषमां वीक्ष्य । अत एव तूष्णीं भवति लोके हिमालयदर्शनेन हिमजड इव ।

चित्रपटके बहुशः चित्रितं काञ्चनजङ्घाशिखरं प्रथमं समीपदृष्टं, न जाने कथं भवितेति चिन्तयामि त्रिपाठिनः सौभाग्यम् । सत्यं, लज्जावत्यो हिमालय शिखरवध्वः । मा हि कश्चिद्दुर्दुरूटो जनः मुहुर्मुहुः तत्र मुखं पश्येदिति सद्य ए स्वतः सूर्यस्पर्शोत्पन्नमेघावगुण्ठनैराच्छादयन्ति स्वमुखानि । किन्तु अद्य त्वित्थं प्रति भाति यद् ह्यः यावत् मेघच्छन्नान्यपि शिखराणि अद्य त्रिपाठिनं दर्शयितुमेव नग्न मुखानि शोभन्ते । सत्यं त्रिपाठिनं समाहूय हिमालयेन स्वमुकुटशोभा प्रदर्शिता तत्समं वर्तनेन साक्षीवाहमपि पश्यामि ।

कार्यव्यापृतमना त्रिपाठी गान्तोकनगरं सप्तवादनवेलायामेव हिमाल सुप्रकटं दृष्ट्वा प्रयाति । गेजिङ्पुरं यावत् तं प्रस्थितं द्रष्टुं तेन सहैव शर्म सह प्रयामि । तस्मिन् प्रयाते नरबहादुरखत्तीवाडासार्धं पेलिङ्पुरं निवर्ते ।

आदिवसं विश्राम्य शर्मणा जङ्गीरामहाभागेन च सार्धं सान्ध्यगोष्ठीसु मनुभूय रात्रौ सुप्तम् ।

अद्य विश्रामदिवसः । आदिवसं काञ्चनजङ्घाशिखरं हिममण्डितं पर्वतकान्त मुपत्यकाः क्षुल्लकांश्च दर्शं दर्शमेव आनन्दितः समभवम् । रात्रौ भोजनवेल मुरवाछङ्रसो दृष्टः परिघ्रातः । अय रसः शवयात्रायामपि दृष्टः आसी तत्र ब्राह्मणेन जीव विदापनकालेऽमृतनाम्ना रसमेनं समर्प्य पीतमासीत् । ज रसोऽयं सोमरसोऽमृतं छङ्मुरवानामभ्यां ख्यातोऽत्र गृहे गृहे पीयते । नीवा न्नरसं मदिरामिव पिबन्ति । उन्मादकत्वेन मदिरा हि एष रसः

स्वादग्रहणमात्रहेतुना गण्डूषमेकमहं पिबामि । तक्रमिव गन्धेन स्वा किन्तु गुणेनोन्मादकत्वं द्योतयति अमृतम् । अभ्यासविहीनं स्वादहेतुना एक ग्रहणेन प्रसन्नचित्तोऽहमद्य देवान् स्मरामि ।

इस्कुस्फलस्य शाकमपि सर्वथा नवीनमद्य खादामि । इत्थमेव सुवि सुप्तम् ।

अथ प्रातरुत्थाय 'अक्कलसिंहलामा' महोदयेन सार्धं सार्धसप्तवादनवेलाया-मेव ओदनं सद्विदलं भुक्त्वा करपट्टिकाश्च पाथेयत्वेन गृहीत्वा मेल्लिमन्दिरं प्रति प्रयामि ! एष अक्कलसिंहः तत्रैव तिङ्लिङ्ग्रामपाठशालायामध्यापकः छोजों ग्रामे निवसति। तेन सार्धं मनोरञ्जनीः वर्ताः कुर्वन् शनैः शनैरवतरन् पर्वत-शिखरात् पर्वतमेखलासु परिभ्रमन् पर्वतपादं प्रयामि। पेलिङ्पुरं पर्वतशिखरे मेल्लिमन्दिरञ्च अन्यस्मिन् पर्वतशिखरे, मार्गः पुनः नोचैः प्रवहमानं क्षुल्लकं सेतुना पारयित्वा प्रथममवतरन् तदनु उच्चलन् विद्यते।

पथि निर्जने स्थाने विद्यमानं सन्तरापादपं वीक्ष्य तस्मात् फलानि त्रोटयित्वा गृहीतानि। क्षुल्लकतीरे गत्वा यावत् फलानि रसपूर्णानि खादयितुं प्रारब्धानि तावत् पश्यावो यत् कानिचित् फलानि सुण्डीकीटसंवलितानि कानिचित् अधरज्वलनपराणि अम्लानि। अतः मध्येधारं प्रक्षिप्य पानीयं निपीय पुनः चरावः

पारेक्षुल्लकं नास्ति प्रचलमाना पद्धतिः। यथाकथञ्चित् प्रतिपदं मात्रमेकमुच्चैः चलित्वा प्रस्रवत्स्वेदधारक्लिन्ननयनकपोलपरिश्रान्तौ सूर्यमयूखतप्तमस्तकौ कण्ट-काच्छन्नपद्धतिपीडितौ कथञ्चित् मेल्लिग्रामात्पूर्वं 'दराप' ग्रामपाठशालायां प्राप्तौ। तत्र चेयं पीत्वा, किञ्चिद्विश्राम्य, तदध्यापकद्योतितं बौद्धब्राह्मणस्य अवतारभूतस्य जातिस्मरस्य गृहमुद्दिश्य प्रयातौ।

मेल्लिपर्वतमेखलायां वर्तते तस्य साधोः आवासः। स दोरर्जाडोग्पा वज्र-गतिः) द्वादशवर्षं गुहासु तपश्चर्यया स्वदिवसान् नीत्वा साम्प्रतं गृहाश्रमस्थो नेपालमहिलासार्धं चतुर्भिः पुत्रैः कुलपतिरिव जीवति। तस्य चित्रं लिखित्वा लवणसंयुतं चेयं च पीत्वा मेल्लिमन्दिरं प्रति प्रस्थितौ।

मेल्लिमन्दिरं तालाकीलितं निर्जनं दृष्टम्। तत्र किञ्चिद्विश्राम्यावां 'फुदुक्' मन्दिरमुद्दिश्य चलितौ स्वः। एतन्मन्दिरं पुरोदृश्यमाने पर्वतशिखरे विद्यते। तत्र गन्तुं पुनरवतीर्य पर्वतशिखरात् मेल्लिग्रामात् पारेक्षुल्लकं प्राप्य फुदुक्पर्वतं चलित्वा चास्माभिः भवितव्यम्। पर्वतादवतरता नेपालिनैकेन साग्रहं दुग्धपानं कारितम्। 'स्मराम्यनेन यत्कदापि क्वापि दत्तं वस्तु कदाचिदन्यत्र स्वयं

केनापि दत्तं प्राप्यते' इति उपदिष्टं मातुः। दुग्धपानानन्तरं क्षुल्लकधारं काष्ठ
दण्डसाहाय्येनोत्तीर्य सर्पिलमार्गेण फुदुङ्मन्दिरं गत्वा तदपि जनशून्यं घासाकी
पश्यामि।

अत्र किञ्चिद्विश्रास्य क्रोशदर्शी पीडामयीं विस्मार्यच्छोजोग्रामे रात्रिनिवासा
साम्प्रतं पर्वतशिखरादवतरावः। मार्गे खल्विन्द्रकीलनाम्नीं पुष्करिणीं पश्यावः
पुष्करिणीयमत्र लोकेषु 'खाचोवेरी' नाम्ना ख्याता। चतसृषु दिक्षु पर्वताः, म
च स्रोतोभिरापूर्य इयं पुष्करिणी शुद्धजला निःशैवालं राराजतेतमाम्। इ
निर्मला यद्धि क्वचिदपि स्थित्वा पारेपुष्करिणीं पर्वतपादपच्छायाभिरप
कान्तारइव पुष्करिणीगर्भः स्पष्टं दृश्यते।

ख्यातं यदेषा पुष्करिणी सैव महाभारतवर्णिता यक्षयुधिष्ठिरसंवादस्थान
भूता यत्र चत्वारः पाण्डवाः मृताः जलपानेन। यक्षप्रश्नानामुत्तरं प्रदा
युधिष्ठिरो विजयते। भवतु, पुराणेषु इन्द्रकीलनाम्ना, साम्प्रतं
त्रैविष्टपेषु 'खाचोवेरी' नाम्ना परिज्ञातेयं पुष्करिणी सम्मुखमेवास्मा
काञ्चनजङ्घापरिसरे लोकमाह्वयतीव। फाल्गुनपूर्णिमायां लब्धजनसम्म
मेलापकसमृद्धा अद्य निर्जना पक्षिभिरेव रक्षिता जागर्ति। अद्यापि ख्या
यदस्ति कश्चित्पक्षी यो हि पतन्तं पत्रं गगन एव चञ्चुभिः गृह्णाति,
जले पतितुं ददात्यवसरम्। स एव जलस्य निर्मलतां परिरक्षति। सत्यं,
किमपि पत्रं घासा धूलिकणलवो वा तस्यां दृष्टाः। यद्यपि एषा गहने वने पाद
सञ्छन्ने पर्वतीयकान्तारे विद्यते तथापि जलौकसः पक्षिसमुदायं च विहाय ना
मलस्य नामापि तस्याम्। तद्दृष्ट्वा अक्कलसिंहेन सह तस्य गेहं गतोऽस्मि।

तत्र रात्रौ मांसशाकेन सह केवलमोदनं मत्पुरतः निहितम्। त
अनशनभयात् मांसशाकं विहाय नवनीतेन लवणेन च सार्धमोदनं भक्कासंवलि
शालिकणानां भुक्तम्। जडत्वभयात् च पुनः अक्कलसिंहेनैव सार्धमेकस्मिन्
विष्टरे सुखं सुप्त्वा निःस्वप्नो भवामि।

प्रातरुत्थायाद्य पुनरिन्द्रकीलपुष्करिणीं गच्छामि। तत्रैव शौचादिकं मज्जन
कृत्वा पुष्करिणीशोभामवलोकयता मया भल्लूकद्वयं व्याघ्रदम्पती च पा

पुष्करिणीं क्रमशो जलं पीत्वा कान्तारे प्रविशन्तो दृष्टाः । भयातुरोऽहं गेहाय पलायितुमारभे किन्तु अक्कलसिंहेन द्योतितं यन्नेमे पारेपुष्करिणीमत्रागन्तुं शक्नुवन्ति । अत्र तु एतेषां समागमः सहजः स्वभावगतः दैनन्दिनं प्रकृतिवशः निर्भयापादकः । इमे यक्षाः । अत्र निर्भयं विचरणीयम् । तथापि लब्धव्याघ्र-दर्शनो नैवाशक्नुवम् अधिपुष्करिणीं घटिकानन्तरमवस्थातुम् ।

ततस्तस्याक्कलसिंहस्य गेहं निवर्त्य मक्कौदनं सतक्रं भुक्त्वा तेनैव सार्धं तिङ्लिङ्पाठशालामागच्छामि । अद्य योजनया दुब्दीमन्दिरं गम्येम किन्तु मेल्लिग्रामसाधुसमागमेन यद्ग्राम्यत्वं पुस्तकानुसारिज्ञानं देशभङ्गभयात् सर्वेषां पलायनं च श्रुतं तद्विज्ञाय अग्रेसारणसाहसो नैवास्ति, अत एव पुनः निवर्ते । क्रोशं स्थितात् तिङ्लिङ्ग्रामात् कश्चिद्विद्यार्थी मया साकं मध्येमार्गं परिचितसेतुस्थानं प्रापयितुं प्रेषितोऽक्कलसिंहेन । महती विडम्बनाद्य यदसौ द्वादशवर्षदेशीयो बालको यां प्राकृतां भाषां वदति, तां नावगच्छामि, न चासाववगच्छति मद्भाषाः । अत एव यत्किमपि वदामि तत्सर्वमेव स्वमुविधामनुसृत्यासा-ववगच्छति ।

तिङ्लिङ्पर्वतादवतीर्य पारेक्षुल्लकं प्राप्यासौ बालको मार्गं नैव परिचि-नोति । मया वार्यमाणोऽपि दक्षिणां दिशं विहाय वामदिशा चलति । असौ वाममार्गोऽप्रचलितपद्धतिक आवक्षःस्थलं घाससंयुतः कण्टकाकीर्णः प्रतिपदं निःपद्धतिकत्वात् प्रायोऽधःपतनशीलः प्रच्छन्नहिंस्रपदचिह्नो भयावहोऽवश्याय-क्लिन्नतया जलौकःस्वर्गरूपो मां पीडयति प्रतिपद बालकमाह्वयामि निवर्तनाय किन्तु नासौ भाषा अवगत्य अवहेलनेन अग्र एव सरति ।

क्वचिद्दूरे पदस्थानत्वात् स्थित्वोच्छलामि, क्वचित्तिर्यग्भूमित्वात् वंशयष्टि-माधृत्य पंगुरिव सद्यश्चलामि, क्वचित्कण्टकपादपानां मुखलग्नशाखा अपसार-यामि, क्वचिज्जलौकसः गृहीत्वा कर्षयामि, क्वचिच्च पुनः बालकमाक्रोशयन् हसामि स्वभाग्यं 'कथं हि मूक इवासौ बालकोऽद्य मां परिश्रान्तं दृष्ट्वापि नावगच्छतीति ।'

सहसा अम्बकपादपः (आमरूद) कान्तारमध्ये किञ्चिदुच्चैःस्थितो दृष्टिपथ-

मायांति । चिन्तयामि यदस्मिन् लम्बमानमेकमात्रमम्बकफलमद्य स्यान्मदर्थम दृश्यते । अन्यथा कुतो हि मध्येकान्तारमम्बकफलम् । परिश्रान्तोऽपि जीवनस्या न्तिमं फलमिव तत्समीपमुच्चैः चलित्वा शाखामवनमय्य फलं त्रोटयामि । तत्फ गृहीत्वा चिन्तयामि यद् यदि जीवामि, पेलिङ्पुरं च प्राप्नोमि तर्हि वित मित्रेष्वेव भक्षयिष्यामि इति ।

कथञ्चित्पुरोदृश्यमानेऽधस्ताद्राजमार्गे समीपतं आगत्य पुनरद्य पश्या यद्भूस्खलनेन विच्छिन्ना वनपद्धतिः । पुनर्निवर्तनभयाद् सरन्नेवावतरामि वालकस्तु पतित एव । राजमार्गं प्राप्य, शिलाखण्डमेकमन्विष्य तदधिष्ठा जलौकःकर्षणे संलग्नः पश्यामि यद्वामपादे विंशतिः दक्षिणपादे च दश त आतिष्ठन्त । ताः निष्कर्ष्य यावद्बालकं द्रष्टुं शिर उन्नयामि तावत्पश्या यन्मामसौ मध्येकान्तारं चिह्नितमात्रे राजमार्गे विहाय धावन्नेव पलावमानो गतो 'न मामसौ पथिकः पुनर्गृह्णीयादिति' । भवतु, तमेव पद्धतिसदृशं रा मार्गमनुसृत्य पेलिङ्पुरमुद्दिश्य प्रचलामि । चिन्तयामि 'मा हि भल्लूकदृष्टिप मागच्छेमेति' ।

मार्गे क्षुल्लकमधिकृत्य वंशसेतुं पश्यामि । वंशद्वयं पारेनदं, वंशचतुष्टयं लौहतारमाधृत्य लम्बमानं, तदेव चरणैः चलित्वा पारेक्षुल्लकं गन्तव्यमि अहमपि पारेभवामि ।

क्रोशद्वयं रिङ्गयित्वा यावद् रिम्बीसेतुमाप्नोमि तावद्राजमार्ग एव स्थि जीपयानमेकं मया दृश्यते । पृष्ट्वा जानामि यदद्य जिलाधीशोऽत्र सपरिज दृश्यमामोदयितुं समागतः । स हि मां परिचिनोति । तेनैव सह पेलिङ्पुरमाग तत्रैव सर्वं तिष्ठामि । स्थित्वा च परिहसन्नहं कण्टकाच्छन्नपादयामितक कण्टकान् निष्कासयितुं प्रारभे । जिलाधीशः तस्य पुत्रः पुत्री च तथैव कण्टक निष्कासयितुमारभन्ते, कथयन्ति च यच्छोधप्रक्रिया नैव सुकरा, अत ए विद्वांसः सत्कारमर्हन्तीति' । सत्यं शोधमावश्यकमत्रगत्यैव दुष्करोऽयं साह पर्वतीयबौद्धत्रिविष्टपब्राह्मणान् द्रष्टुं, तेभ्यश्च पुनर्जन्मसिद्धान्तं ज्ञातुमत्र दुर्गमे भन्यावहेषु हिंस्रनिचितेषु हिमालयका तारेषु हिमजडेषु विभ्रान्त इव परिभ्रमा

भवतु, अतः सुखं भुक्त्वा पक्वान्नानि पीत्वा च स्वादुकाफीरसान् तैः सहालपन् पेलिङ्पुरं प्राप्नोमि जीपयानेन ।

अद्य कोजागरी चतुर्दशी । पूर्णप्रायश्चन्द्रः । तस्य सुधाकरैः दुग्धस्नात इव काञ्चनजङ्घापरिसरो हिमजटितोऽद्य समाह्वयन्निव सिंहनादैः गुञ्जायमान इव, उपत्यकासु निर्झरचञ्चलसारक्लिन्न इव सम्मुखं विभाति । गगने सुधाकरः, उपत्यकासु निर्झरधाराः अन्तरिक्षे च काञ्चनजङ्घाशिखराणि हिममण्डितानि सर्वं दुग्धधवलं जगत् मोदैरापूरयति समेषां चेतांसि । मध्यरात्रौ दृश्यमेनं दृष्ट्वैव शर्ममहाभागेन कवितारसं च निपीय स्वपिमि । नैव जाने क्व संसारः, क्व च ब्रह्मलास्यं, क्व वा कृष्णनाट्यलीलाविहितो रासरसः, क्व च वा पुनः हिमालय-लास्यमिति मुदा स्वपिमि ।

अद्य विधिवदारामः कृतः । पूर्वेद्युः पदातिना मया चलता पर्वतप्रान्तेषु दक्षिणपादस्य कनिष्ठिका स्फोटकपीडिता कृता । तत्र महती पीडा सञ्जायते । पीडया विश्रामोऽद्य विवशतया कृतो दिवसनिद्रया । पीडारामः सुतरां विहितः । सायङ्काले पेलिङ्पाठशालायाः आचार्येण निमन्त्रितः तस्यैव गृहे सान्ध्यगोष्ठी-सुखमनुभवन् गीतैरामोदे ।

अद्य शरत्पूर्णिमा । आचार्यगेहात् शर्मगृहं गच्छता मया निरभ्रे वियति माहिषदधिसन्निभः काञ्चनजङ्घाशिखरपरिसरः चन्द्रिकया द्विगुणीकृत इव व्यलोकि । समग्रोऽपि हिमालयघट्टिकाप्रदेशः क्षुल्लकरवगुञ्जितः केसरीहुङ्कारप्रतिध्वनिभिः ध्वनितः, पुष्करिणीप्रतिबिम्बनैः बिम्बितः कौमुदीलासितः त्रैविष्टपो लोकोऽद्यापरः स्वर्ग इव विभाति । अग्रपुर्याः तेजोमहालयोऽद्य (ताजमहल) नीरसः कृतः, समुद्रोत्सङ्गसुषमा क्षाररसा कृता, वृन्दावनरासकौमुदी मृतप्राया कृतानेन हिमालयहिमपरिसरबिम्बन पेलिङ्प्रान्तदृष्टेन । सत्यमद्य सफलेयं शोधायात्रा पेलिङ्पुरे । इत्थं पुलकितोऽद्य स्वपिमि ।

ह्य एव ज्ञातं यदद्य गेजिङ्पुरे हट्टकदिनम् । पुनश्च तत्राद्य बौद्धब्राह्मणा

अपि समागन्तारो यतो हि हट्टकेष्वेव अत्र आवश्यकाः सामग्र्य एकत्र क्रीयन्ते विक्रीयन्ते च । एतद्विज्ञाय पाठशालाध्यापकैः आचार्येण च सह हट्टकं प्राप्तोऽस्मि ।

अद्य अत्र जागरितं गेजिङ्पुरम् । सहस्त्रवर्गमात्रके हट्टकस्थाने सहस्त्रप्रायाः जनाः इतस्ततो भ्रमन्ति । कदलीफलादारभ्य स्वर्णं यावत् वस्तूनि विक्रेतुं जनाः (प्रायः स्त्रियः) तिष्ठन्ति पङ्क्तिवद्धाः । शिरःसु दाम्ना आधृत्य, पृष्ठेषु सामग्री-पिटकानि निधाय, स्वेदक्लिन्ना आगत्य स्वस्वस्थानेषु स्थित्वा वस्तूनि विस्तार-यन्ति । लोकाश्च आवश्यकं वस्तु क्रेतुं परितोऽवलोकयन्ति ।

मया मधु, कदलीफलानि अम्बकफलानि च क्रीत्वा, एकत्र निधाय बौद्ध-ब्राह्मणानामन्वेषणे दृष्टिर्विधत्ता । पश्यामि वेशविशेषान्, यान् परिधायात्र ब्राह्मणाः सिक्किमदेशे परिभ्रमन्ति । इतस्ततोऽत्र हट्टके दशद्वादशब्राह्मणाः धृत-कौशेयवाससो वक्खूवस्त्रपरिहितगात्राः दृश्यन्ते । स्वमित्राणि पुनर्मेलाय विहाय ब्राह्मणैः सहालपन् पुनर्जन्मावतारादिवार्ताः कुर्वन्नेवाहं हट्टके एकैकं ब्राह्मणं परिभ्रमामि ।

तेषु प्रामुख्येण द्वौ ब्राह्मणौ वेदितव्यौ । एकः कुन्जुङ्ग्याचोलामा, अत्र पेलिङ्पाठशालायां त्रैविष्टपवाङ्मयस्याध्यापकः । द्वितीयः पुनः खल्वाटशिरस्कोऽ-ज्ञातनामा पेमायाङ्चीमठस्य मुख्यो ब्राह्मणः । भाषाभेदात् पेमायाङ्चीमन्दिरं पद्मशिखरमन्दिरमिति कथयितुं शक्यते ।

अत्रैव सूचितोऽहं यच्छ्वः पेमायाङ्चीमन्दिरे न्यायाधीशस्यान्त्येष्टिक्रियारूपाः पारेमृत्युमन्तराभवपूजाः भविष्यन्ति । अयं न्यायाधीश स एव यस्य श्मसानयात्रायां नाम्चीपुरात् बूम्तारमन्दिरात् सङ्करपर्वतं गत आसम् । साधुः खल्वसौ समयो भविष्यति श्वः यत्तस्यैव पूर्वज्ञातस्य द्वितीयान्तरालस्य पूजाः भविष्यन्तीति सज्जं मनः कृत्वा स्वापस्थानं पेलिङ्पुरं निवर्ते ।

मार्गे राणामहाभागेन प्रथमदिवसपरिचितेन सह तस्याग्रहात् 'त्रीणि मित्राणि सहैवेति' सार्धमेव मुखचित्राणि चित्रपटकेन मुद्रयामः । स्यादिदं समूहचित्रं चिरस्थायि स्मारकञ्चेति क्षणभङ्गुरं जगत् स्मारं मन्दं मन्दं हसामि ।

आचार्यस्य कलामये कक्षे सान्ध्यगोष्ठी सज्जते । आचार्येण शर्मणा राणामहोदयेन द्वित्रैश्चाल्पपरिचितैरध्यापकैः, मेरठजनपदनिवासिना पेलिङ्पाठशालालिपिकेन च सार्धं तिष्ठामि 'चौपाल' गोष्ठ्याम् । सहसा तारभाषयन्त्रमाह्वयितुमारभते । ज्ञायते यदियं सिङ्तामपुरतः प्रखरमहाभागानामाह्वानघण्टा नदति । तत्र कुशलं विज्ञाय निश्चिन्तो भूत्वा गोष्ठ्यां गीतैरनुमोदयामि समेषां प्रस्तावान् चर्चाः गीतानि च ।

ततो निवर्त्य स्वपितुं कम्बलशरणं गच्छामि

अद्य प्रातःकाले विनैव सूर्योदयामारुणिमदर्शनं कुक्कुटाह्वानं श्रुत्वैव कम्बलविष्टरे मया त्यक्ते । सद्यः शौचमज्जनादिकं निर्वाह्य सार्धसप्तवादनवेलायामेव भुक्तमाकण्ठं करपट्टिकया चर्मरीशाकेन (चमराई) च मधु । ततः प्रथमेन सयानेन पेमायाङ्चीमठं प्राप्नोमि । मठपरिसरे देवदारुपरिवृतः कानने पाटलोवनसदृशः पेलिङ्पर्वतशिखरस्थः, पद्मशिखरस्थनामधेयः परिचीयते । यतो पगन्धः तत्र पेमायाङ्चीमठ इति लोके ख्यातः । प्रायः सार्धसप्तसहस्रमात्रमुच्चैः ागरजलतलात् शीतलहरिपटले विद्यते स्थानमिदम् ।

तत्र गत्वा मन्दिरे समान्तरासन्दिकयोः स्थितान् अष्टौ ब्राह्मणान् मन्त्राच्चारयतोऽपश्यम् । आज्ञप्तस्तै वाद्यपटकं प्रोद्घाट्य तस्मिन् मन्त्रान् उच्चार्यणान् निधातुं प्रारब्धम् । पूजानन्तरं तैः श्रावयितुम् आगृहीतः वाग्दाम विलोमं ालयित्वा उच्चारणं तान् श्रावयामि ।

श्रूयमाणेषु ब्राह्मणेषु सहसा कश्चिदान्दोलनप्रवाहः दृश्यते । श्रूयते च मया कश्चिज्जनसमूहः शवयात्रावाद्यमिव वादयन् मन्दिरसमीपमागच्छतीति । ह्मणैरुक्तं यन्मन्त्रसमूहं पूजानन्तरं श्रोष्यामः । साम्प्रतं तु न्यायाधीशपरिजनाः तीयान्तरालपूजां विधातुमत्रागच्छन्तीति ।

एतदर्थमेव समायातोऽयं जनः सुप्रसन्नो भवति । स्थित एव ब्राह्मणानां पृष्ठे, ं पाथं च चेयं वारं वारं, विश्रान्तः नामग्राममपि पूजां वाद्यपटके निधाय, श्चागत्य नाम्चीपरिचितैः वालैः सहालपन् घर्मतप्ते भूप्रदेशे तिष्ठामि ।

ब्राह्मणैः पुनरालभ्य ज्ञातं यत् त्रैविष्टपाः विश्वसन्ति षड्विधेषु जीवनान्तरालेषु । ते द्विविधाः । प्रथमं जीवनकालेऽन्तरालाः त्रयः । पुनश्च मरणानन्तरं जन्मनश्च पूर्वं त्रयोऽन्तरालाः । जीवनकाले हि मूर्च्छानिद्रास्वप्नाः । मरणानन्तरं जन्मनः पूर्वञ्च मृत्युरुत्प्लवनं पुनर्जन्मप्रयासश्च । एतेऽन्तराभवाः । एतेषां रहस्यज्ञानेन निर्वाणप्राप्तिः सुकरा सहजा अवश्यम्भाविनी च । अद्य खलु उत्प्लवनान्तरालस्य पूजा आसीत् यत्र सर्वे देवाः दानवा वा साक्षात्प्रकटीभूय मृतकं निर्वाणाय पुनर्जन्मने वा साहाय्येन कृतार्थयन्ति ।

अतोऽनन्तरमद्यैव साङ्चोलिङ्मठेऽपि मध्याह्नानन्तरं पूजा भवितेति पूर्वमेव प्रबन्धाय साङ्चोलिङ्मठं क्रोशे स्थितं प्रयामि ।

साङ्चोलिङ्मठः पेमायाङ्चीमठात् क्रोशार्धमवतीर्य क्रोशार्धं च पुनरुच्चैः चलित्वा तथैव मध्येकान्तारं भल्लूकादिनिचिते शीतपटले विद्यते । पद्धतिमार्गेण अत्रागत्य मठं निर्जनं प्राप्नोमि । निःकीलान् कपाटान् प्रोद्घाट्य मन्दिरमतिरिच्य सर्वेऽपि गेहाः दृष्टाः । मन्दिरं कीलितकपाटं प्राप्य व्रजेङ्गितमार्गेण किञ्चिन्नीचैः गत्वा मन्दिरसेवकं पश्यामि । तं च मधुरवाचा प्रभावयित्वा मन्दिरं समवलोकितं, दुष्प्राप्यान् मन्त्रसमुदायान् वाक्पिटके निधाय धन्यवादो व्यवहृतः सायङ्काले च सूर्येऽस्तप्राये ताम्रवर्णं काञ्चनजङ्घाशिखरं दर्शं दर्शं निवर्ते ।

स्मरामि यदद्य दुष्प्राप्यान् मठरहस्यान् ज्ञात्वा दृष्ट्वा च कृतार्थोऽस्मि । पेमायाङ्चीमन्दिरे दृष्टं यत् प्रथमे भूतले मन्दिरमञ्चस्थाः यमान्तकवज्रकीलबुद्धपद्मसम्भवातारा:, भित्तौ च अन्तराभवसूत्रचित्राणि (Bardo Thodol) अजन्तागुहासदृशानि चित्रितानि । द्वितीये मन्दिरपटलेऽष्टौ पद्मसम्भवस्यावताराः मञ्चस्थाः भित्तौ च तस्यैव लीलाचित्राणि चित्रितानि तृतीये चान्तिमे मन्दिरपटले वैतरणीनदी 'पञ्चभूमिकः प्रसाद' इव सान्तोब्रीनाम्ना स्थापिता भित्तौ च अष्टाधिकसहस्राः बुद्धाः चित्रिताः । साङ्चोलिङ्मन्दिरेऽपि तथैव प्रमुखकक्षे मञ्चस्थाः देवाः तदनु समान्तरासन्दिकस्थानं छादनतलकक्षे च चतुरशीतिसिद्धाः मूर्तिप्रतिष्ठया तिष्ठन्तीति ।

साङ्चोलिङ्मठे ज्ञातं यत् मृतकपूजागामिनि बुधवासरे भविष्यतीति दिनचतुष्टयकृते तदर्थं पेलिङ्पुरे पुनः विरमामि ।

साङ्चोलिङ्मठात् निवर्तनकाले काचिदन्यैव पद्धतिरनुसृयते। मार्गे कस्मिंश्चिद्गृहे काचिद् बाला गां दुहती दृष्टा। चिन्तयामि सदवसरस्य सद्योदुग्धपयसः सद्यःपानस्य, येन धारोष्णं पयः उदरं पूरयेदिति। तां पृष्ट्वा तिष्ठामि। सा स्मितवदना हिन्दीवाचमनवगच्छन्ती 'दुग्धपिपासामात्रमनुमोदयित्वा मां शिरश्चालयित्वा स्थातुं कथयति। दुग्धं प्रतीक्षमाणस्तत्रैव विरमामि।

दुग्ध्वा सा वंशपात्रे धारोष्णं दुग्धमानीय तेनैव पात्रेण मां पाययति। किमपि नवीनमास्वाद्य स्मितवदनां तां पृच्छामि कियद्दूरे स्थानादस्मात् पेलिङ्-पाठशाला विद्यत इति। सा केवलं पेलिङ्पाठशालाशब्दमवगत्य अँगुलीङ्गनेन मामनुसर्तुमाज्ञाप्य अग्रतश्चलति। शतपदानि चलित्वा नीचैः पेलिङ्पाठशालां प्रदर्श्य पुनरागमनाय इङ्गयित्वा सा निवर्ततेऽहं च पाठशालां प्रति पुरतश्चलामि। किञ्चिद्गत्वा सा समाहूय किमपि कथयति किन्तु तामनवगम्य हसित्वा चलाम्येव। तद्वाचं प्रातः तस्याः पाणिपल्लवेषु स्वनिवासद्वारे दधिपूर्णं वंशपात्रं दृष्ट्वावगच्छामि। भवत्वद्यापि सायङ्काले धारोष्णं पयः पाययितुमागृह्य सा गच्छति। अहं हि सायङ्काले दधिसंयुतं 'मक्का'-न्नाद्यचूर्णौदनं भोक्तुं बध्नामि। स्मरामि स्वजन्मदिवसस्य प्रमाणपत्रोल्लिखितस्य वर्तमानदिवसस्य 'अद्य' स्य। दध्योदनभोजनं मिष्टं पक्वान्नं मक्काचूर्णकस्येति मय प्रियतमम्।

प्रातर्भोजनं कृत्वा प्रातःकालीनेन बसयानेन न्यायाधीशगृहे गेजिङ्पुरवर्तिनि गच्छामि, 'भवेत् खलु कश्चित्पुनर्जन्मभावनाविषयी वार्तालापः तस्य परिजनैः सार्धमिति निश्चीय। किन्तु ते सर्वथा प्राकृताः आहारनिद्राभयमैथुनपराः नैव किमपि जानन्ति पुनर्जन्मनः, केवलं लोकविहितामन्त्येष्टिक्रियामेव कर्तुं जानन्तीति तस्य गृहादापणं प्राप्नोमि। तत्र बदरीप्रसादश्रेष्ठिनः विपणके तिष्ठामि। अत्रैव पायं पायं स्वादु चेयं त्रिवादनवेलायाः पेलिङ्गामिनं बसयानं प्रतीक्षे।

तेन बसयानेन गृहमागच्छामि। धारोष्णदुग्धपानाय अद्यापि गच्छामि। ततो निवर्त्य दध्योदनं भुक्त्वा उन्मुक्तं स्वपिमि।

अद्य आदिवसं विश्राम्य, मलिनवस्त्राणि प्रक्षाल्य, घर्मातपं सुसेव्य, सायङ्काले नेपालगामिनि राजमार्गे क्रोशचतुष्टयं परिभ्राम्य दुग्धौदनं मधुमिश्रञ्च आकण्ठं भुक्त्वाशय्यायां साम्प्रतं शये । स्वप्स्याम्येव मधुरं किञ्चित्क्षणानन्तरम् ॥

ह्यः सायङ्काले परिभ्रमता मया सार्धं जङ्गीरामहाभागेन द्योतितमासीत् यत् 'नेपालगामिनि तस्मिन् 'उत्तरे' बद्धे राजमार्गे क्रोशचतुष्टयं गत्वा 'छाङ्' प्रपातः दर्शनीयः ।' अद्य तत्रैव गन्तुं सज्जोऽस्मि । चिन्तयामि च यत्तत्र मार्गे कश्चित् बौद्धब्राह्मणोऽपि मिलेत् चेत् प्रपातदर्शनं फलप्रदं भविता ।

सौभाग्येन मम, नववादनवेलायामेव राणामहाभागः सूचयति यत्तस्यावकाशानामाकस्मिकानां द्वादशदिवसाः सन्ति, कार्यदिवसाश्च व्यतीतप्रायाः, शरदवकाशो समीपमागतः अतः अद्य आकस्मिकमवकाशमामोदयितुं सोऽपि मया सार्धं छाङ्प्रपातं गन्तास्ति । किं किं कथयामि, तस्य वार्तां श्रावं श्रावं प्रसन्न एव न, प्रफुल्लहृदयो भवामि । सद्य एव प्रातर्भोजनं कृत्वोदरं चाकण्ठं प्रपूर्यावां प्रस्थितौ ।

प्रयाणं सुलभं, किन्तु क्रोशचतुष्टययात्रा अनभ्यस्तचरणस्य राणामहाभागस्य पादारविन्दयोः स्फोटकं कर्तुमुद्यतास्ति । स घाताहतः मन्दं मन्दमुच्छलन् खञ्ज इव चरति । अहं पूर्वमेव याग्राधिक्येन खञ्जप्रायोऽपि सहन्नेव चरामि ।

स्मरामि वाल्मीकिवर्णितस्य रामाश्रुणः प्रथमावतारजातस्य, गायामि च—

सद्यः पुरीपरिसरेषु शिरीषमृद्वी
गत्वा जवात् त्रिचतुराणि पदानि सीता ।
गन्तव्यमस्ति कियदित्यसकृद्ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम् ॥

सत्यमद्यात्र नास्ति रामो न च सीता, किन्तु राणासुधाकरौ । राणामहाभागश्च क्रोशमेकमेव गत्वा वारं वारं पृच्छति-कियद्दूरेऽस्ति च्छाङ्प्रपातः, पुनश्च निवर्तनीयमप्यद्यैव वर्तते इत्यादि ।

कथमपि प्राप्ते मध्याह्ने आवां छाङ्प्रपातं प्राप्तौ । शतमात्रमुच्चैः पर्वत-

गह्वरे दृश्यतेऽयं प्रपातः। दक्षिणायनस्थत्वात् मध्याह्नत्वाच्च सूर्यः साक्षाद्धवली-करोति प्रपातासारकणिकाः। सीकरशुभ्राः सूर्यरश्मिरञ्जिताः विविधं चित्राणि निर्माय प्रपतन्ति शिलातले पुनरुच्छलितुमिति धूमधार इव मेघधार इव रजतासार इव हिमधार इव यशःकणासार इव, किं किमालपामि 'सर्वमिव' सुशोभन्ते। वर्णनबलाभावत्वादन्तःमौनमेव वरीय इति तूष्णीं तिष्ठामि।

भूमिशायी प्रपातशोभां पश्येमेति राजमार्गाद्बहिः शिलातलमाश्रित्य स्वेदिलमास्तीर्य (Sweater) तदुपरि शये। राणामहाभागो दूरे तिष्ठति। प्रपातशोभां पिबन्नेव, सीकरासारशीतकणान् स्वशरीरस्पर्शेनानुभवन्नेव, घर्मातपमापिबन्नाजृम्भमाण एव कदा निद्रोत्सङ्गे गत इति नैव स्मरामि। यदा शिर उत्थाय पश्यामि, राणामहाभागस्य वाक्यानि शृणोमि-उत्तिष्ठ त्रिपाठिन्! प्रातः घण्टावधिका निद्रा समनुभूय साम्प्रतं चरतु पेलिङ्पुराय इति।

उत्थाय, पाणिपादं मुखं च प्रपातशीतजलेन प्रक्षाल्य किञ्चित्पानीयमुदरे कृत्वा मन्दं मन्दं प्रपातादपसरामि। राणामहाभागोऽग्रेचरति। अहं समनुसरामि।

साम्प्रतमतिश्रान्तो राणामहोदयः। कथयति यत्तस्य शिरसि पीडा, पादयोः रक्तचापो धारया चलति, मेरु स्फुटति, दंष्ट्राचालने च पित्तप्रवाहकालस्य तिक्तता, रिक्तता युक्तता चानुभूयते। किं करामि, 'विरम्य चरावः' इति निश्चरावावां कथं कथमपि चलावः।

गमनकाले नीचैः मार्गत्वात् सौविध्येन प्राप्तौ प्रपातस्थलीं साम्प्रतमुच्चैः मार्गत्वात् द्विगुणपरिश्रान्तं चलावः। एकत्रैका दशवर्षीया बाला न जाने, किं दृष्ट्वा आवां सकाशं शनैः शनैः सम्मुखमागत्य पर्वतीया बिभेति, सत्वरं च पृष्ठतः पलायते। पुनरेकत्र कस्मिंश्चिद्विपणके शर्कराखण्डं क्रीत्वावां चूषावः चरावश्च। इत्थमेव कथं कथमपि चरन्तौ सन्ध्याताम्रे नभसि पेलिङ्पुरं प्राप्तौ। बुभुक्षू समीपवर्तिनि खाद्यविपणके गत्वा शाकशष्कुली भुक्त्वा चेयं द्विवारं पीत्वा धर्मं च निष्कासयित्वा लब्धस्फोटकौ बहिरागत्य शय्यां प्राप्य तथा सुषुप्तौ यथा प्रातरेवोत्थितौ सूर्यबिम्बितं हिमशिखरं पश्यावः।

प्रातः विलम्बेन सुभार्षसिहाह्वानेन शय्यां चेयं पातुमेव त्यजामि । बहिरागत्य कक्षात् दर्शं दर्शं सूर्यशोभां हिमालयशोभाञ्च चेयं पिबामि ।

अद्य मृतन्यायाधीशस्य पुनर्जन्मपूजा साङ्चोलिङ्मन्दिरे भवितेति सत्वरं शौचमज्जनादिकेभ्यो निवृत्तो भूत्वा सज्जो भवामि । शर्मामहाभागेन चन्द्रचूडेन सार्धं प्रतिष्ठामि । प्राचार्यस्य गेहं गत्वा किञ्चित्कालं तेन सहालप्य च शर्मा कथयति यदद्य मया सह साङ्चोलिङ्मन्दिरं गन्तुमसौ न शक्नोति, प्राचार्येण सहापरां गन्तेति ।

भवतु, स्वयोजना स्वयं पूरयितव्येति ब्राह्मणान् प्रतीक्षमाणः स्वनिवासद्वार एव सूर्यरश्मीन् सेवमानः तिष्ठामि ।

एतस्मिन्नेवान्तरे ज्ञायते यत्पार्श्ववर्तिनि त्रैविष्टपगेहे कश्चिच्छागो हन्यते । विक्रेष्यति च हत्वा छागमांसं भोक्तृभ्य इति । निरामिषभोज्यप्यहं छागवधकाले मांसनिष्कासनकाले चावयवसंस्थानं साक्षाद्द्रष्टुं वधस्थानं गच्छामि, ब्राह्मणांश्च साङ्चोलिङ्गामीन् प्रतीक्षे यद्यदा ते गन्तारः तदाहमपि गन्ता भवितास्मि, अन्तराले च छागावयवसंस्थानं पश्यामि—भवति ह्यवयवसंस्थानं सर्वेषां प्राणिनां प्रायः समानमेवेति स्वसंस्थानमपि कायस्य ज्ञातास्मीति ।

एकेनैवासिप्रहारेण हतश्छागः । शिरः पृथङ्निपतति, रुण्डः त्रैविष्टपैस्त्रयैः तथा गृहीतो यथा मा हि रक्तं गलच्छिद्रात् वहिः; पततु, पात्र एव पतेदिति । सर्वं रक्तं बहिरागतं वायुस्पर्शादेव जडं पिण्डमिव भवतीति साक्षात्पश्यामि । निश्चले निर्जीवे च सति रुण्डपिण्डेऽसौ लौहपात्रे निहितः । क्वथमानं जलं तदुपरि सम्यक् सिञ्चयित्वा त्रिभिः जनैः एकेन लुञ्चनक्रियया, द्वितीयेनच्छुरिकया तृतीयेन च दर्वीमुखक्षौरकर्मणा (खुखरी) छागकेशान् निष्कास्य क्षौरकर्म विहितम् । पश्यामि यत्कृष्णकेशश्छागः साम्प्रतं नदीछाग इव श्वेतवर्णो जातः हरिद्रारसं विलिप्य पुनः छुरिकया क्षौरं विधाय, पुनः क्वथमानेन जलेन प्रक्षाल्यासौ छागोऽन्यत्र धौते लौहपात्रे निहितः ।

प्रथममुदरं विदीर्णम् ! उदरं विदीर्य मलस्थानानि बहिष्कृतानि तदा खाद्यानि मेदोमांसहृत्फुप्फुसयकृताण्डादिपिण्डानि अस्थिसंलग्नानि मांसादि

ण्डानि चर्मसंयुतानि च मेदोमांसादिपिण्डानिच्छुरिकया निष्कास्य एकत्र ग्रथितानि । तदनु शतग्राममात्रया मापयित्वा क्रेतृभ्यो विक्रीतं छागमांसपिण्डम् ।

रक्तमांसाद्यवयवदर्शनलब्धसंस्थानज्ञानो ब्राह्मणानागमनलब्धावसरो सूर्यातप-कलब्धप्रज्ञानो हि चिन्तनपरोऽयं जनः निवासद्वारे निद्रालुः प्रसुप्तः । चतुर्वादन-लायां सुभाषसिंहेनाहूतो जागरितः प्रक्षालितवदनः क्रोशस्थस्य कामेश्वरसिंहस्य Overseer) प्रमापकस्य गेहं गत्वा साम्प्रतं तैरालपन् तिष्ठामि ।

'गृहिणी गृहमुच्यत' इति अस्मान् गुहानिवासिनः कथयित्वासौ कामेश्वरसिंहः ादु मधुरं च शाकशष्कुलीमिश्रां पकौड़ीसज्जां सूत्रिकां भोजयित्वा रात्रिप्रारम्भ निवर्तितुमाज्ञापयति । आकण्ठं च उदरं पूरयित्वा पेलिङ्पुरं निवर्ते ।

अत्र ज्ञातं यदद्य भारतसर्वकारस्य विशेषाधिकारिणः समागन्तारः । तान् ीक्षमाणेन प्राचार्येण सह आकाशवाणीरसमनुभवन्नेव शर्मणा सार्धं प्राचार्य-व निवासे रात्रिप्रारम्भं नयामि । नववादनवेलायामागत्य हासैः प्रलापै गाथा-श्चामोदितः कालो मध्यरात्रिं यावत् रात्रिगोष्ठीरसपूर्णो व्यतीतः । तदा शेषाधिकारित्रयं गान्तोकनाम्चीगेजिङ्पुरेभ्योऽत्रागतं क्रोशार्धस्थे विश्रामगृहे , शर्मणा च सह अहं स्वनिवासे समागतः । तत्र कम्बलविष्टरे प्रविष्य पिमि ।

अद्य मध्याह्नानन्तरं ताशीदिङ्मठं गन्तास्मि शर्मादाससुभाषाश्च मामनुग-रः । अत एव प्रातरेवोत्थाय भोजनादिकं सम्यग्विधाय साम्प्रतमेकाकी निवास-आसन्दिके तिष्ठामि, लिखन्नेव कालंच नयामि, यतो हि तेऽध्यापकाः ालयं गताः मध्याह्नानन्तरमत्रागत्य मया सह गन्तार इति । अतः परं ाह्नात् घण्टावधिकः कालोऽस्ति ।

साम्प्रतं हि तैः सार्धं ताशीदिङ्मठाय प्रतिष्ठामि । अस्माभिः सह द्वौ कर्मार्थिनौ अध्यापकगृहीतौ स्तः ।

दासमहोदयः आगृहीतोऽपि सर्वान् पृष्ठे कृत्वा अग्रतो धावति । जाने, साम्प्रतं मार्गः प्रस्तरसोपानमयश्च, अत एव नैव स्वगतिनिरोधेऽसौ क्षमो धावति, ुल्लकमुच्चैः चलने मन्दं मन्दं चलन्नेषः पृष्ठतो भविष्यति । भवतु चुम्बुङ् प्राप्ते वयं साम्प्रतं पर्वतमेखलामनुसृत्य साक्याङ्पाठशालां प्रति वर्धामहे । इलायचीक्षेत्रेषु वंशकान्तारेषु च चलद्भिरस्माभिः चूष्यन्ते । साक्याङ्पाठ- प्राप्य किञ्चिद्विश्राम्य पथिकेन केनचिदत्रत्येनैत्र मार्गं पृष्ट्वा च वयमग्रे

चरामः ! ततो नीचैः लम्बमानो पद्धतिमार्गः सुभाषमहोदयस्य अनभ्यस्तचरणस्य
चरणौ प्रकम्पयन् सर्वेषामन्येषाञ्च प्रस्खालयन् प्रतिपदं मात्रमेकं द्वयं वा नीचैर-
वतरति । चतुर्वादनवेलायां वयं पर्वतपादे प्रवहमानं, कलकलं निनदन्तं रक्तपीत-
नीलवर्णपक्षिपक्षक्षालितं च लादुङ् क्षुल्लकं प्राप्नुमः । परिश्रान्ताः वयं सेतौ
चिपटौदनं भुक्त्वा, निर्मलंञ्च क्षुल्लकजलं निपीय विश्रान्ताः ताशीदिङ्पर्वतं
साक्षान्नभस्येवोचैः प्रतिपदं मात्रत्रयं चलामः । मार्गेऽन्धकारभयेन वनेचरहिंस्रपशु-
भयेन उच्चावचमार्गस्खलनभयेन हरितशष्पच्छन्नजलौकोभयेन च चन्द्रचूडशरण-
प्रपन्ना वयं हसन्त एव चलामः ।

कथमपि तारादर्शनवेलया सहैव ताशीदिङ् पाठशालां प्राप्नुमः । अत्र पूर्व
सूचितोऽध्यापकः सञ्चमानाभिधो नास्तीति शङ्कमानचेतसो वयं कमपि बालकं
पार्श्वस्थं यावत्पृच्छामस्तावदसौ सूचयति यदध्यायकमहोदयः स्वगृहे तिष्ठत्यस्मा
प्रतीक्षमाणः बालकश्च नेतुमस्मान् । अत्र मधुरं चेयं पीत्वा विश्राम्यामः । घृतद्विद
लशाकमिश्रमोदनं चाकण्ठं भुक्त्वा यात्रद्विष्टरेपु गच्छामस्तावत्ताशीदिङ् निवासिभि
समागृहीता वयं सान्ध्यगोष्ठीरसं तितिक्षवोऽपि त्युक्तुं नैव समर्थामहे ।

मया कथितं यच्छयनकक्ष एव सान्ध्यगोष्ठी स्यादतः सर्वे तत्रैव गच्छन्ति
शयनकक्षे भूमौ विष्ठरवस्त्राणि विस्तीर्णानि, पर्यङ्के चैकमात्रे काष्ठपटलत्रयनिर्मि
डालडाटिनचतुष्टयाधृतचरणे नवविधे पटशयने व्यासस्थानं निर्मितमस्ति । पेलि
ङ् पाठशालाध्यापकैः मम सहयात्रिभिः पूर्वमेव द्योतितमासीद्यदसौ त्रिपाठी मेरस्य
विश्वविद्यालयस्य संस्कृतप्रवक्ता पुनर्जन्मशोधको ज्ञातत्रैविष्टपवाङ्मयः साधकश्चा
ध्यात्मविद्यायाः यदि समागृहीतः तर्हि किमपि साधु वक्ष्यतीति ताशीदिङ् निवा
सिभिः भूयोभूयः समागृहीतः विवशाऽस्मि । सुपुप्यार्धनिमीलितनेत्रोऽपि क्रोशद्व
चलित्वोच्चावचपर्वतीयमार्गं परिश्रान्तोऽपि मित्रैः भूमौ शयितुमिच्छन्नपि टिन्न
पर्यङ्कशय्यायां पुनर्जन्मविषयिणीं वार्तां करोम्येव । दशवादनवेलायां च तुष्
वसिति वासिभिः अनुगृहीतः मित्रैश्च विवशाकृतः पर्यङ्क एव स्वपिमि ।

प्रातरुत्थाय जानामि यदेतः ाशीदिङ् आपणं गृहचतुष्टयात्मकं सहस्रचतुष्टः
मात्रमुच्चैः समुद्रजलतलात् अत एव ऊष्मप्रायं समृद्धञ्च । ऊर्णावस्त्राणि वाक्पि
कञ्च शयनकक्षे निधाय पार्श्ववाहिनि निर्झरे गत्वा नग्नकाः वयं शौचस्नानादिभि
मुदिताः यावन्निवर्त्तामहे तावन्मधुरं चेयं पीत्वा कृतकृत्या इवानुभवामः नर्व
वादनवेलायां सहस्रमात्रमुच्चैः क्रोशे च स्थिते ताशीदिङ्मठपरिसरं प्राप्नुमः ।

'यथा नाम तथा गुणाः' इति नामानुसरणेन पवित्रज्ञानस्थानमिदं ताशीदि
मठस्थानम् । ध्वजमये ताशीदिङ्मठपसिरे पर्वतशिखरेऽपि समतले भूपटले द
द्वादशमन्दिराणि सन्ति । तेषु ब्राह्मणाः निवसन्ति गुरुकुलेषु ।

त्रीणि मन्दिराणि मुखमन्दिराणि देवप्रतिमासज्जानि मध्ये ताशीदिङ्-
मन्दिरं तारामूर्तिसुशोभितं काष्ठमण्डलनिर्मितं धर्मचक्रप्रवर्तनयन्त्रैः गुञ्जायमानं
ब्राह्मणासनपीठसरणिद्वयसुसज्जं तूर्यडमरुकदुन्दुभिनादनादितं राराजतेतमाम् ।
उदीच्यां ताशीदिङ्मन्दिरस्य रालङ्मन्दिरं बुद्धमूर्त्तिसमृद्धं धर्मचक्रनिचितं
राराजते । दक्षिणायाञ्च पेमायाङ्चीमन्दिरं पद्मसम्भवसमृद्धं सुशोभते ।

सत्यमत्रेयं नूतनी परम्परा यद्धि मठत्रयाणां साधकमन्दिराण्येकत्रैव ताशी-
दिङ्परिसरे समीपमेव सन्ति । तेषां पृथङ्मठस्थानेषु सत्स्वपि पृथङ्निसेव्य-
स्थानानि पृथङ्मन्दिराणि एकत्रापि भवितुमर्हन्तीति प्राप्तेष्ववसरेषु एकत्र आगत्य
सर्वे साधयन्ति यन्त्रानिति । साम्प्रतं पञ्चदिवसपर्यन्तं तन्जूरपाठः सञ्जायते ।
तेष्वपि मन्दिरेषु गत्वा तेषां पाठान् वाक्पिटके निधाय मुदितचेताः तैः सह
र्जन्मवार्ता करोमि । खिन्नो भवामि यत्ते केवलं गर्दभा इव मन्त्रभारं वहन्तोऽ-
ात्मविषयेषु न स्वयं साधयन्ति, न स्वयमनुभवन्ति । भवतु, अप्राप्तेऽपि स्वशोध
प्रये नवनवस्थानदर्शनोत्थमानन्दमनुभूय सन्तुष्यामि ।

साम्प्रतं ताशीदिङ्मन्दिरपरिसरात् वयं निवर्तामहे । आपणे विष्टरस्थानं
लब्ध्य घृतशाकद्विदलौदनानि भुक्त्वा पाठशालां प्राप्नुमः । अत्र 'शिशवः नृत्यगीता-
दिकं प्रदर्शयितुं सज्जाः' इति सञ्चमानेन सूचिताः सभास्थलं प्राप्नुमः । रूप्यक-
द्वकेन मिष्टचूर्ण्यान् क्रीत्वा शिशुषु वितरणाय नयामि ।

अत्र शिशुभिः तथा गीतं तथा च नृत्यं प्रस्तुतं यद्धि दिल्लीसदसः स्मृति-
पटे चित्रितानि । तेषु नृत्यपञ्चकं तु तथा सुन्दरं यद्धि तेषां ध्वनिजातं वाक्पिटके
ध्याय स्थायि विहितम् । भवतु, साम्प्रतं तस्मादपि स्थानान्निवर्तामहे पर्वताच्चा-
रोहामः ।

क्रोशं नोच्चैरवतीर्य ज्ञातं यन्मम परिधानवस्त्रं (Jerkin) क्वचिन्मार्गेऽजानति
प पतितम् । अतो वाक्पिटकं तत्रैव मित्रेषु निधाय धावन्नेवोच्चैः आरोहामि ।
अर्धं गत्वा वामतो लम्बमानवदरीकण्टकेषु लग्नं जर्किन्वस्त्रं पश्यामि ।
गृहीत्वाश्वस्तः पश्यामि स्वात्मानं प्रपतत्स्वेदधारं विलन्नगात्रं तारं श्वासैः
तं क्लान्तावयवत्वान्निवर्तनेऽसमर्थञ्च । उपहसामि स्वलोभप्रवृत्तिम् । भवतु,
कथमपि मन्दं मन्दं रिङ्गन्नवतराम्येव । विस्मृतपद्धतिकोऽहं कस्मिंश्चिदन्यस्मिन्
मार्गे गत्वापि सेतुदर्शनाल्लब्धविश्वासः प्राप्नोमि स्वगन्तव्यं मित्राणि च
विश्रामलब्धस्वापानि ।

अत्र शवासनेन मत्स्येन्द्रासनेन हलधनुरासनाभ्याञ्चात्मानं सम्यग्वि-श्रास्य पुनः मित्रैः सार्धमुच्चैः साक्याङ्पर्वतशिखरस्थपाठशालामुपसरामि। मार्गे कियान् परिश्रान्तः क्लान्तः व्याकुलो वास्मीति नैव वक्तुं शक्नोमि, मूर्च्छितमात्रं नास्मि, अन्यथा सर्वं स्मरणपटले विद्यते वर्त्स्यते चेति जाने।

प्राप्ते चुम्बुङ्ग्रामे नभसि ताराः सुसज्जाः दृश्यन्ते। क्रोशद्वयं मार्गः सहस्रत्रयञ्चोच्चैः पेलिङ्पुरं मार्गदीपकञ्च (Torch) नास्ति सकाशमस्माकमिति जानन्तोऽपि वयं सवने भल्लूकनिचिते कान्तारे हासैः व्याघ्रगर्जनं परस्परं करतल-ग्रहणेन मार्गादर्शनं, गाथाभिर्बुभुक्षा, पुनः पुनश्चलनैः क्लिन्नजम्बालमार्गस्खलनं. वारं वारं 'यो सटक् सजीलो छ' पद्धतिरियं सज्जास्ति) इति कथनैः मार्गश्रमं चावहेलयन्तः विकृतनामभिरस्मान् स्वयं विडम्बयन्तः कथमपि सप्तवादन-वेलायां रात्रौ पेलिङ्पुरं प्राप्नुम एव। आचार्यगेहे क्वथमानं लवणमयं चेयरसं चूषणक्रियया निपीय विश्रान्तोऽहं सत्वरं वाक्पिटकं कम्बलं वस्त्राणि च शयन-स्थाने निधाय भोजनाय गच्छामि।

अद्य आकण्ठं शाकद्विदलमिश्र[illegible]नं भुक्त्वा, ताशीदिङ्पाठशालायाः नृत्य-गीतादिकं वाक्पिटकात् श्रुत्वा च [illegible] स्वपिमि।

अथ प्रातः भूरिविलम्बेन नववादनवेलायां शय्यां त्यजामि। मम शोधयात्रायाः सर्वाणि कार्याणि पूर्णानि। कृतकृत्योऽस्मि। अत एव महती तन्द्रा श्रमपीडा च देहं त्रोटयन्त्यौ सह्येते। तथापि स्नात्वा मलिनानि वस्त्राणि प्रक्षाल्य, तैलमर्दनानन्तरं पुनश्च स्नात्वा दुग्धौदनं भोक्तुं भोजनालयं प्राप्नोमि।

भोजनानन्तरं घर्मातपे कम्बलं विस्तीर्यादिवसं स्वपिमि।

चतुर्वादनवेलायां सन्ध्यामुखे कश्चित् सोतापुरनिवासी सिक्किमपाठशाला-निरीक्षकः समायाति। स बहुशः प्रश्नान् पृष्ट्वा द्योतयति यदत्रत्याः गुप्तचराः मामन्वेषयन्तः सन्ति। गान्तोकाद्धि कश्चिदधिकारी गुप्तचरोऽपि समायातः। भवतु शोधमात्रकार्यव्यापृतोहं निश्चिन्तोऽस्मि. नास्ति खलु कश्चिद् देशद्रोही कार्यक्रमो मम। रात्रिभोजनं कृत्वा पुनः स्वपिमि।

अद्य गान्तोकपुरं गन्तुं सज्जोऽस्मि। आचार्येण सह जीपयानेन मध्येऽहनि प्रस्थितोऽस्मि। सायङ्कालेऽस्तङ्गतेऽहिमरश्मौ गान्तोकपुरं प्राप्तो विरमामि।

मुद्रक : 'फाइन प्रिन्ट' १०६ शहराराबाग, इलाहाबाद